Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO.	NEW	241	OLD	209
FOLIO		163		

TITLE

1. तर्कसंग्रहव्याख्यान ।
2. सिद्धान्तलक्षण ।

प्रतियोगितावच्छेदकावच्छिन्नेयत्रत्वतीतियथाश्रुतमूलात् यत्पदार्थेसाध्येप्रतियोगितावच्-
छेदकावच्छिन्नान्यत्वंप्रतीयते॥ततश्चवह्निमान्धूमादित्यादौहेतुसमानाधिकरणमहा-
नसीयवह्नित्वाद्यवच्छिन्नानावमादायदोषदुर्वारः॥सर्वेषामेववह्न्यादीनांतादृशान्यावप्र-
तियोगितावच्छेदकविशिष्टतयातदन्यत्वासत्त्वात्॥यत्पदार्थस्ययद्रूपावच्छिन्नंपरतयाप्र-
पावच्छिन्नस्यप्रतियोगितावच्छेदकायेयेधर्माःप्रत्येकंतदवच्छिन्नान्यत्वमित्यर्थेसाध्यताव-
च्छेदकस्यतत्तत्प्रतियोगितावच्छेदकधर्मावच्छिन्नभेदकूटेनप्रत्येकंसामानाधिकरण्यपर्यव-
सितेवह्न्यादिसाध्यकहेतौवन्हित्वादिविशिष्टवह्न्यादिमत्त्वांतर्भावेनमहानसीयवह्नित्वाद्य-
वच्छिन्नभेदैःप्रत्येकंसामानाधिकरण्यसत्त्वेप्येकव्यक्तिकसात्त्वादिसाध्यकेसत्तात्वादौहेतु-
मन्निष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नभेदसामानाधिकरण्यासत्वाद

आप्तिः॥ यद्रूपावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नाविषयकप्रमित्वोतीविषयइत्यर्थेउक्त
दोषोद्धारेपियद्रूपवन्निष्ठप्रतियोगितावच्छेदकभिन्नप्रतियोगितावच्छेदकाविषयकप्रतीतिर्
विषयोवाऽस्त्वतएवसामंजस्यप्रतियोगितावच्छेदकविशिष्टाविषयकप्रतीतिविषयत्व-
स्यसाध्यतावच्छेदकविशिष्टेनिवेशनमनुचितं॥ एवंस्वरूपसंबंधरूपावच्छिन्नत्वस्यविव-
क्षयायद्रूपावच्छिन्नप्रतियोगित्वंतत्तानावच्छिन्नप्रतियोगितावच्छेदकानवच्छिन्नमित्यर्थेसुव- सु
व न्हित्वादिरूपसाध्यतावच्छेदकावच्छिन्नप्रतियोगित्वमवगाहमानसायत्वादिविशिष्टवन्हित्वाघ
नवच्छेदत्वमुल्लनमेवयद्रूपावच्छिन्नप्रतियोगित्वंतादृशप्रतियोगिताभिन्नमित्युक्तौस
मवायादिनाघटादौसाध्येसंयोगादिनाघटादिद्वैतावतिव्याप्तिः॥ संयोगादिसंबंधावच्छि-
न्नघटत्वावच्छिन्नप्रतियोगितायाहेतुमन्निष्ठाभावप्रतियोगिताभेदसत्त्वात्॥ दंवा-

चंज्ञेयत्वादिसाद्यावव्याप्तिवारणार्थहेतुमन्निष्ठाभावप्रतियोगितायांसाध्यतावच्छेदक
संबंधावच्छिन्नात्वस्यनिवेशनीयतयाव्यभिचारिमात्रएववासंबंधांतरावच्छिन्नसाध्यता
वच्छेदकावच्छिन्नप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताभेदस
त्वेनातिव्याप्तिःस्यादितिप्रतियोगिताभेदमुपेक्ष्यप्रतियोगितावच्छेदकावच्छिन्नभेदोपाद
नेसाध्यतावच्छेदकसंबंधावच्छिन्नत्वभेदानुयोगिसाध्यतावच्छेदकावच्छिन्नप्रतियोगिता
यांनिवेश्यातिव्याप्तिवारणेकेवलान्वयिसाध्यकेमाहयत्राप्रतियोगिताऽप्रसिद्ध्याऽव्याप्ति
रिति॥सामिश्रव्याख्यापरिष्कारेपिगौरवमित्युपाध्यायोपदिष्टनञ्द्वयसत्त्वासत्त्वपक्षमवलंब्य
व्याचष्टे॥प्रतियोग्यसमानाधिकरणेति।नचनञ्द्वयसत्त्वेनसाध्यतावच्छेदकेप्रतियोगितावच्
२५ छेदकभेदनिवेशोपिधूमवन्हित्वादौमहानसीयत्वादिविशिष्टवन्हित्वादिभेदस्यासत्वात्सा

ध्यतावच्छेदके प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयत्वमेव विवक्षणीयं। तदपेक्षया
साध्यतावच्छेदकावच्छिन्नप्रतियोगित्वे प्रतियोगितावच्छेदकानवच्छेद्यत्वनिवेशपक्षेण गौरव
मित्येतिर्वा। प्रत्येकं घटादौ घटपटोभयत्वाद्यवच्छिन्नभेदवत् शुद्धवह्नित्वादौ महानसीयत्वाद्यं
तर्भावेन पर्याप्तविशिष्टवह्न्याद्यभावीयप्रतियोगितावच्छेदकत्वावच्छिन्नभेदस्य सुघटत्वात्॥
अवच्छेदकाविषयकप्रतीतिविषयत्वस्याविवक्षणमंतरेणैव प्रतीकारात्॥ अवच्छेदकत्वस्य
वह्नित्वमहानसीयत्वादिनिष्ठस्य संबंधभेदेन भिन्नत्वे पि तत्प्रतियोगितावच्छेदकत्वत्वाद्यनु
गतरूपेणाव्यासज्यवृत्तिजायाः एकवह्निलक्षणे वह्नित्वादेरवच्छेदकत्वपर्याप्त्यनधिकरण
त्वमुपपादितवतो दीधितिकारस्यानुमतत्वात्॥ सार्वभौमैस्तु विशेषधर्मावच्छिन्नप्रतियो
गिताकूटानतिरिक्तसामान्यधर्मावच्छिन्नप्रतियोगितासंबंधस्य विशेषरूपेणाव्यासज्यवृत्ते

रपिसामान्यधर्मावच्छिन्नप्रतियोगितासंबंधत्वेनानुगतेनव्यासज्यवृत्तित्वमितिकंठरवेणोक्तं॥ए
वमतिमहानसीयवह्निनिष्ठवह्निमान्धूमादित्यादौसाध्यतावच्छेदकमहानसीयवह्निनिष्ठ-
त्ववह्नित्वाद्योः प्रत्येकंधूमादिसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वपर्याप्त्यनधिक
रणत्वेपिप्रकृतानुमितिविधेयतावच्छेदकतायादृशरूपावच्छिन्नेपर्याप्ततादृशरूपावच्छिन्नानु
योगिताकतादृशावच्छेदकत्वावच्छिन्नभेदस्यैवव्याप्तिघटकत्वोपगमेननातिव्याप्तिः॥उक्तरू-
पव्याप्तीयानुमितिविधेयतावच्छेदकतापर्याप्त्यवच्छेदकदर्शितधर्मद्वयनिष्ठद्वित्वाद्यवच्छिन्नेहे
तुमन्निष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वपर्याप्तिमतिविरोधेनतदवच्छिन्नभेदासत्वात्साध्य
वह्नित्वस तावच्छेदकवृत्तिमहानसीयवह्निनिष्ठत्ववह्नित्वोभयत्वाद्यनुपस्थितिकालेतदवच्छिन्नेनवच्छे
दकत्वस्यदुर्ग्रहतयाऽनुमित्यनुत्पादोव्यापकताज्ञानकारणतावादिनामिष्टएवतेनतेनरू-

पेणानवच्छेदकत्वात्प्रत्वात्तत्तद्रूपावच्छिन्नविधेयतावच्छेदकताकानुमित्यनुपपत्तिः केव-
लान्वयिग्रन्थे ग्रन्थकृतैव वक्ष्यते। पर्वतत्वेन हेतोर्निवेशे हेतुव्यक्तिभेदेन व्याप्तिर्निर्घटिता॥ सा च-
नानुमित्युपयोगिनी। पक्षीयधूमादिव्यक्तिव्यापकतायाः पूर्वं वह्न्यादावगृहीतत्वादिति यद्रूप-
विशिष्टेत्युक्तं। तथा च धूमत्वादिरूपहेतुतावच्छेदकधर्मानेव विशिष्य निवेश्य तत्तद्रूपावच्छिन्न-
हेतुकानुमित्यौपयिकव्याप्तिर्निर्वाच्या॥ तथा च महानसादौ धूमवत्त्वस्यादिसहचारग्रहाद्वह्नि-
त्वादौ तद्धूमत्वावच्छिन्ननिरूपितायाः स्वपक्षीयधूमादिसाधारणधर्मत्वाद्यवच्छिन्ननिरूपिताया-
नच्छेदकता श्च व्यापकताया ग्रहसम्भवात्तद्घटितव्याप्तेः पक्षधर्मधर्मग्रहादनुमितिनिर्वाह इति भाव-
ः॥ न च सामानाधिकरण्यसम्बन्धावच्छिन्नव्याप्तित्वपक्षे हेतुव्यक्तिभेदेन व्याप्तिभेदपक्षे नेद आवश्यक एवे-
त्यनुगतरूपेण हेतुनिवेशो व्यर्थ इति वाच्यम् हेतुव्यक्तिभेदे व्याप्तिभेदेऽप्यनुगतरूपेण हेतुनि-

वेशे धूमव्यापकवन्हिप्रतियोगिकधर्मनिष्ठसामानाधिकरण्यत्वादिना धूमादिनिष्ठसकलवन्हि
सामानाधिकरण्यव्यक्तीनामनुगमात्सामान्यप्रत्यासत्त्यापि पक्षीयहेतुनिष्ठव्याप्तेरपि प्रथमं ग्रह
संभवेनानुमित्युपपत्तेः॥ तत्तद्व्यक्तित्वेन हेतुनिवेशेऽननुगमात्सामान्यप्रत्यासत्त्यापि पक्षी
यहेतुनिष्ठव्याप्तेर्व्याप्तित्वेन दुर्ग्रहतयानुमित्यनुपपत्तेः॥ हेतुतावच्छेदकाश्रयाधिकरणत्वमुपेक्ष्य
तद्विशिष्टनिरूपिताधिकरणत्वप्रवेशप्रयोजनमग्रे वक्ष्यते प्रतियोगितानवच्छेदकत्वमात्रेण
साध्यतावच्छेदकनिवेशे वन्हित्वत्वादिना वन्हित्वादिमनवगाहमानात्प्रतियोगितानवच्छेदक
वत्त्वसमानाधिकरणाभावान्नित्यादिज्ञानाद्वन्हिमान्नित्याद्यनुमितिः स्यात्। न चेष्टापत्तिसंभवः॥ कदा
चिद्वन्हित्वेन कदाचिद्द्रव्यत्वादिना वन्ह्यनुमितिरिति नियमानुपपत्तेः॥ न चानवच्छेदकत्वेन त
त्त्वधर्मावगाहित्वमेव व्याप्तिग्रहस्यानुमितौ विधेयतावच्छेदकतया तत्तद्धर्मभाननियामकमि

तुबे

तिवाच्यं॥ अनवच्छेदकत्वेन वह्नित्वादिनानेन सत्त्वादिनानस्यापि प्रायत्नः संभवात्॥ एवं तत्तत्सा
ध्यतावच्छेदकावच्छिन्नव्यभिचारितया हेतुज्ञानस्य हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानव
च्छेदकत्वमात्रेण तत्तत्साध्यतावच्छेदकावगाहिव्याप्तिज्ञानाविरोधितया विशिष्टसाध्यतावच्छेद
कानवगाहिव्याप्तिज्ञानस्य हेत्वव्यभिचारस्य हेत्वाभासतानुपपत्तिश्चेति॥ विशिष्टसाध्यसाध्यताव
च्छेदकस्य व्याप्तिघटकताया अपतित्वधर्मावच्छिन्नयावन्निरूपितेः तत्तत्पदेन तादृशप्रतियोगिता
नवच्छेदकस्योपादानानुरोधेन च प्रतियोगितानवच्छेदकावच्छिन्नेत्यनुक्त्वा प्रतियोगितानव
च्छेदको यो धर्मस्तदवच्छिन्ने सुक्तं॥ यत्र वह्नित्वत्वादिविशेषणावच्छिन्नस्य साध्यतावच्छेदकता
तत्र तेन तेन रूपेण तत्तद्धर्माणां व्याप्तिघटकता यत्र स्वरूपत एव वह्नित्वाघटत्वं उ धर्माणां साध
तावच्छेदकत्वं तत्रापि विशेषणानवच्छिन्नतत्तद्धर्मे घटिततत्वधर्मघटिततत्तद्धर्मवदितराहृ

त्तित्वरूपवन्हित्वत्वादिनातन्निवेशोनतुस्वरूपतएव॥अनवछेदकत्वरूपविशेषणपुरस्कारे
णज्ञानेनिर्विशेषणकज्ञानात्मकस्यस्वरूपतोज्ञानस्यासंभवात्॥वह्न्यादीतरावृत्तित्वस्यव
ह्न्यादिमात्रवृत्तिधर्मांतरसाधारण्येपितन्मात्रपुरस्कारेणव्यापकतावछेदकत्वग्रहस्यापिवन्हि
त्वाद्यवछिन्नविधेयकानुमितिहेतुत्वमुपेयतेस्म सकलवह्न्यादिवृत्तित्वविषयतानिवेशगौरवा
त्॥सकलवह्न्यादिवृत्तित्वस्यवह्न्यादिवृत्तित्वस्यवह्न्यादीतरसाधारणतयातन्मात्रपुरस्कारेण वृत्ति
व्यापकतावछेदकत्वग्रहस्यनहेतुत्वसंभवः॥तथासतिइंधनादिहेतुकापिवन्हित्वाद्यवछिन्नानु
मितिप्रसंगात्॥सकलवह्न्यादिवृत्तित्वस्यत्वादौइंधनादिव्यापकतावछेदकत्वसत्वात्॥वन्हि
त्वादिनिष्ठतद्व्यक्तित्वधूमजनकतावछेदकजातित्वादेर्वन्हित्वादिमात्रवृत्तित्वेपितनरूपेण
व्यापकतावछेदकत्वग्रहाद्वन्हिमानित्याद्यनुमितिरनुभवसिद्धायेनरूपेणोपस्थितेर्वह्न्यादौ वन्हित्वादौ
नौ

तरसाधारणंपसंज्ञापोनज्ञायतेतत्पुरस्कारेणव्यापकतावछेदकत्वग्रहादेवोक्तानुमितुत्पादानुप
न्नवात्॥अतेर्वज्ञानत्वत्वानुगतत्वव्यापकगुणत्वव्याप्यजातित्वपोरविशेषणज्ञानत्वरूपेणव्यापक
९ तावछेदकत्वग्रहात्॥ज्ञानवानयमित्यनुमितिर्नभवितुमर्हतीतिदीधितिकारवक्ष्यमाणदूष
णंघत्युक्तं॥अधिकमग्रेवक्ष्यामः॥तत्रव्याप्तिसामानाधिकरण्पनतत्रव्याप्तिगमकताप्रयोज
कंपर्वतीपधूमेमहानसीयवन्हिसामानाधिकरण्यप्रदेपितत:पर्वतेव्याप्यवत्ताज्ञानादिवशान्म
हानसीनयवह्न्यनुमितेरितिदर्शयतियेनकेनापितियावन्निरूपितेत्यास्यांतद्रूपविशिष्टस्यतद
धर्मावछिन्नयावन्निरूपितान्यातिरितितद्रूपावछिन्नस्यतद्धर्मावछिन्नयावद्व्याप्तिगमकता
प्रयोजिकाव्याप्तिरित्यर्थः॥पपाऽस्तुतएकसाध्यव्याप्तिसामानाधिकरणावरणस्यापरव्याप्तिप्र
प्रतियोगिकत्वासंभवेनासंगते॥यत्रैकैकसाध्यतावछेदकव्याप्तिर्नसकलहेतुमद्वृत्तिताप्र

वछेदिकातत्रानुगतरूपावछिन्नेनापितेनरूपेणाचनताहशहेतुव्यापकतासंभवः सकलसाध्यता
वछेदकव्यक्तीनामेवचालनीन्यायेनहेतुसमानाधिकरणतत्तद्व्यक्त्यवछिन्नाभावप्रतियोगि
तावछेदकत्वादित्याशंकामिष्टापत्त्यापरिहरति। डंत्वादाविति। परंपरासंबद्धमिति। स्वसमवायि
संयोगादिसंबंधेनसाध्यसंबद्धमित्यर्थः॥ एवंचसाध्यावृत्तितयादंडत्वादेर्नव्यापकतावछेदकत्व
संभवइत्याशंकानिराकरणाय। साध्यतावछेदकं। दंडिसंयोगादिरूपंनानाधिकरणवृत्ति
तावछेदकावछिन्नहेतुव्यापकतावछेदकमित्यर्थः॥ एवकारेणदंडादिरूपसकलंधर्मव्यव
छेदः॥ तथाचतत्प्रतियोगितानवछेदकत्वस्यदुरुपपादत्वेपिनक्षतिः॥ दंडत्वादिनैवप्रका
तत्र रेणतद्धेतुकदंडानुमितेरुपगंतव्यत्वात्॥ व्यापकतावछेदकत्वंक्रमादेवदंडादिप्रकारकां
अनुमितेरुपगमात्। स्वाश्रयघटितपरंपरासंबंधेनयत्रधर्मेव्यापकतावछेदकत्वमहस्त

द्विशिष्टधर्मिप्रकारेणसामानाधिकरण्यप्रतियोगितयासाध्यावगाहिव्याप्तिग्रहस्यैवतद्धर्मविशिष्टदं
डादिरूपधर्मिणोनुमितिविधेयतावच्छेदकताप्रयोजकत्वोपगमेनदंडिमानित्याकारानुमितेस्त्वन्मस्य
मतादृशायानिर्वाह्यत्वादितिचाव ॥ अथमहानसीयवन्हित्वादिसहितवन्हित्वादेर्धूमादिमन्निष्ठ
भावप्रतियोगितावच्छेदकत्वेपिशुद्धवन्हित्वादिरूपसाध्यतावच्छेदकस्यतादृशप्रतियोगितान
वच्छेदकत्ववत्तत्तादिविशिष्टदंडस्यतादृशप्रतियोगितावच्छेदकत्वेपिदंडत्वाद्यवच्छिन्नस्यता
दृशप्रतियोगितानवच्छेदकत्वस्यसुघटतयातस्यव्यापकतावच्छेदकत्वानुपगमोनसंगच्छते ॥ नन्व
तत्तद्दंडीनास्तीतिबुद्धेस्तत्त्वोपलक्षितएवदंडेप्रतियोगितापर्याप्तिर्नासतेनतुतत्त्वामतत्त्वोपलक्षितत्वे
पलक्षितव्यक्तेरेवानतिप्रसक्ततयातत्ताशस्यस्त्ववच्छेदकातत्त्वेगौरवादतोविशेष्यस्यावच्छेदकत्व
पर्याप्त्यधिकरणतयादंडत्वविशिष्टस्यापितस्यानवच्छेदकत्वंदुर्घटं ॥ महानसीयवन्ह्याद्यभावप्रति

वच्छेदकता

योगितायांवह्नित्वादेरतिप्रसक्ततयातन्मात्रेऽवच्छेदकतापर्याप्त्यसंभवेनमहानसीयत्वादेरवच्छेदकी
तन्नावआवश्यकइतिशुद्धवह्नित्वादेस्तादृशाभावप्रतियोगितानवच्छेदकत्वंसुघटमितिवाच्यं॥स्वरूप
तोन्नासमानस्यैवस्वरूपतोऽवच्छेदकतायाःसिद्धांतसिद्धतयासर्वस्यपदार्थस्यदंडादेःस्वरूपतोऽव
च्छेदकत्वासंभवेनदंडत्वासंभवेनदंडत्वादिविशिष्टस्यातिप्रसक्ततयातत्तादिरूपविशेषणम
नेतन्नाद्यतत्रावच्छेदकत्वपर्याप्तेरयोगात्॥अन्नावृत्तियोगितावच्छेदकतयानासमानेउपलक्षणी प्र
भूतधर्मांतरस्यतानोपगमेतुउपलक्षणतयादंडत्वमात्रेतत्तद्दंडावच्छिन्नाभावप्रतियोगितावच्छे
शे दकतयाभासमानतद्दंडांशेविषयाबाधसंदंडोनास्तीतिप्रत्ययस्यदुर्वारत्वात्च॥अत्रकेचित्
उक्ताशयेनैवदंडाद्यवृत्त्यादिपदोपादानं॥आदिनाचपृथिवीत्वादिमावृत्तिजातित्वादिनाऽनुगम

दंडिमति

ग.श.०

तीक्तस्यघटत्वमृत्तिकात्वपाषाणत्वादिमतःसमवायादिनापृथिव्यादिहेतुकसाध्यस्यतादृशजातित्वस्यचपरि
ग्रहः॥समवायादिनाहेतुत्वतपृथिव्यादिमतितंतुकपालादौविशेषणानवच्छिन्नघटत्वपटत्वाद्यवच्छिन्ना-
नावस्यसत्वात्॥सर्वास्वेवसाध्यतावच्छेदकतादृशजातिषुतयाविधानावप्रतियोगितावच्छेदकत्वपर्याप्ति
स्त्वासांव्यापकतावच्छेदकत्वासत्त्वेनतदनुगमकोक्तधर्मस्यैवपरंपरासंबंधेनतथात्वोपगमस्यावश्यकत्-
त्वादित्याहुः॥अन्येतु॥तत्तद्दंडवान्नास्तीत्यभावादौप्रतियोगिविशेषणतयाभासमानेषुदंडादिष्वेवप्रतियोगि
तावच्छेदकत्वपर्याप्तिर्नास्ति।तद्विशेषणतत्वादौतुतदवच्छेदकतावच्छेदकत्वमेवप्रतियोगिताधिकरण
स्यतदवच्छेदकत्वासत्त्वेनतदंतर्भावेनतदवच्छेदकतापर्याप्त्यसंभवात्।अनवच्छिन्नावच्छेदकत्वमेवचस्व
रूपतोवच्छेदकत्वंतत्स्वरवंडेनास्तीत्यादौदंडादेरनवच्छेदकत्वंदुर्घटं।महानसीयवन्हिर्नास्तीत्यादौचमहानस-

त्वानवच्छिन्नावच्छेदकत्वमेवनिवेश्यमितिवाच्यं।सप्तदंडसाध्यतावच्छेदकव्यभिचारिण्यतिव्याप्तेः४ तथा
दंडादेरनवच्छेदकत्वंदुर्घटं + नवीनःपाठः४

सीयत्वादेः प्रतियोगिन्येव विशेषणतया ज्ञानात् तदंतर्भावेनैव प्रतियोगितावच्छेदकत्वपर्याप्तिर्न्नासत
इति विशेषः ॥ अथ वन्हित्वादेरेव सामानाधिकरण्यसंबंधेन विशेषणतया महानसीयत्वादिकमव-
गाहमाना महानसीयत्वविशिष्टवन्हित्ववान्नास्तीत्याकारिकापि प्रतीतिस्तस्यामुक्तयुक्त्या वन्हि-
त्वादावेव प्रतियोगितावच्छेदकत्वपर्याप्तिविषयकतया वन्हित्वादेरप्यनवच्छेदकत्वं दुर्घटमेव स्यात् ॥
यदि च वन्हित्वादेः समवायेन प्रतियोगितायां सामानाधिकरण्यसंबंधेन च महानसीयत्वादेस्तदवच्छेद-
कतायामवच्छेदकत्वे गौरवान्महानसीयत्वादिसहितस्य वन्हित्वादेः प्रतियोगितायामेवावच्छेदकत्वमु-
क्तप्रतीतिस्तु कंबुग्रीवादिमान्नास्तीतिवदवच्छेदकतांशे भ्रमरूपैवेत्युच्यते तदा यत्र सामानाधिकरण्य-
संबंधेन महानसीयत्वादिविशिष्टस्य वन्हित्वादेः साध्यतावच्छेदकता तत्र स्थलीयव्यभिचारिणि धूमादिहे

ग०धा०

तावतिव्याप्तिरिति स्वविशिष्टसंबंधिनिष्ठेत्यादिना निर्वाच्यं पारिभाषिकमेवावच्छेदकत्वं निवेशनीयं ॥ तच्च
लक्षणे यादृशस्य स्वपदार्थस्य निवेशस्तादृशत्वं ॥ एवं च महानसीयत्वादिविशिष्टस्य वह्नित्वादेस्तत्र स्व
पदेनोपादानसंभवात् विशिष्टवह्नित्वत्वादिकमेव पारिभाषिकमवच्छेदकत्वं तदवच्छिन्नेतरत्वस्य तु वह्नि
त्वादावपि तु घटस्तथा चावच्छेदकं यादृशं स्वं तादृशावच्छेदका[illegible]प्रतीतिविषयत्वमेवानवच्छेदक
पदेन विवक्षणीयं ॥ तथा च सति सखंडस्य दंडादेः स्वरूपतोऽनानात्त्वादिविशेषणविशिष्टस्यैवावच्छे
दकत्वलक्षणस्य स्वपदेनोपादेयतया तद्विशिष्टविषयकप्रतीतिविषयत्वस्य दंडत्वादिविशिष्टस्य
सुघटत्वाद्व्यापकतावच्छेदकत्वमव्याहतमेवेति चेत् ॥ न पारिभाषिकावच्छेदकत्वस्य दंडत्वादिवि
शिष्टस्य स्वत्वघटितत्वेनाननुगतस्याभावकूटस्यानासंभवेन प्रतियोगितायाः स्वरूपसंबंधरूपावच्छेद

कत्वस्यागत्यागुरुधर्मसाधारण्यमंगीकृत्यव्याप्तिलक्षणेतदेवनिवेशनीयंएवंचसामानाधिकरण्यसंबंधे
नमहानसीयत्वादिविशेषणावच्छिन्नस्यवन्हित्वादेर्हेतुमन्निष्ठाभाववृत्तियोगितावच्छेदकत्वेपिमहान
सीयत्वादिविशिष्टनिरूपितसमवायादेरेववृत्तियोगितावच्छेदकताघटकसंबंधत्वंतत्रोपेयते॥शुद्धस
मवायादिनावन्हि[illegible]त्वादेरतिप्रसक्तत्वात्॥शुद्धसमवायादेस्तत्रावच्छेदकतावच्छेदकत्वेमहानसीयत्वा
दिसामानाधिकरण्योपलक्षितवन्हित्वाद्यवच्छिन्नाभावात्तद्विशिष्टवन्हित्वावच्छिन्नाभावस्यैवलक्षणा
नुपपत्तेश्च॥तथाचसाध्यतावच्छेदकताघटकशुद्धसमवायादिनाऽखंडवन्हित्वादेरनवच्छेदकत्वेन
दुर्लभं॥नचमहानसीयत्वादिसामानाधिकरण्यस्यैवोपलक्षणतातत्रतस्यावच्छेदककोटौनप्रवे
शः॥यत्रविशेषणत्वंतत्रतस्यप्रवेशाइत्यनएववैलक्षण्यमितिवाच्यं॥उपलक्षणानवतत्तद्रूपावच्छिन्न

२ त्वेमानस्यावरूपकतयाऽवच्छेदक

ग०धा०

प्रतियोगितावच्छेदकताकाभाववुद्धावपितत्तद्रूपस्यप्रतियोगितावच्छेदकांशेप्रकारतयाभानात्तत्राव
च्छेदकतावच्छेदकेंशशरीरप्रवेशरूपोपलक्षणतायाउपलक्षणविधयाप्यवच्छेदकेतत्रासंभवात्॥
यद्युपलक्षितनिरूपितसमवायादेरवच्छेदकताघटकसंबंधत्वंतस्योपलक्षणतयाप्यवच्छेदकत्वंयद्वि
शिष्टनिरूपितसमवायादेरवच्छेदकताघटकसंबंधत्वंतस्यविशेषणविधयाप्यवच्छेदकत्वमित्यस्यैववि
शेषत्वात् मणकत्वप्रागभावविशिष्टघटादेः संयोगादिसंबंधेनाभावस्यप्रतियोगितायामप्रसिद्धत
याविशिष्टनिरूपितसंयोगादेरवच्छेदकत्वासंभवेनागत्याविशेषणविधयाप्रतियोगितावच्छेदक
त्वस्याभ्युपेयत्वेनवैलक्षण्यस्योपपादनीयतयायुक्तसमवायादेरवविशिष्टसत्ताघटाभावप्रतियोगिता
वच्छेदकसंबंधतयातादृशाभावस्यतादृशसंबंधेनप्रतियोगिसमानाधिकरणतयादोषितिकृतं

प्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्यपर्यन्तनिवेशमाहत्तिसंगतिः।।मान्त्वद्वा विशिष्टनिरू
पितसमवायत्वादिनाप्रतियोगितावच्छेदकसंबंधता। तथापि महानसीयत्वादिसामानाधिकरण्योप
लक्षितवह्नित्वादेस्तद्विशिष्टवह्नित्वादेश्च प्रतियोगितावच्छेदकतयोर्वैलक्षण्यपरिच्छाद्यातद्धर्मावच्छि
न्नविशेष्यपर्याप्तात्वात्पाच विशेष्यविशेषणतापन्नयोर्धर्मधर्मिणोर्द्वयोः पर्याप्तेरेवं। सोवोपपादनीये।
तावतापि स्वरूवउस्यशुद्धवह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वमुपपद्यते। धर्मान्तरोपल
क्षितवह्नित्वाद्यवच्छिन्नाभावस्य धूमादिमत्सत्त्वे विशिष्टवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितायाः
श्चतावच्छेदकतायाञ्च श्चविशेषणातर्भावेनैव पर्याप्तेस्तत्तोपलक्षितदंशावच्छिन्नप्रतियोगिताक
हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकता च तत्तावच्छिन्नाशुद्धविशेष्यएव पर्याप्तासाध्यतावच्छेद

गादाधरी ८

कतावच्छेदकघटकस्तुद्रव्यत्वसंयोगसंबंधावच्छिन्नत्वाच्चतादृशसंबंधेनदंडादेस्तादृशज्ञानावच्छिन्नप्रतियोगितानवच्छेद
कत्वंदुरुपपादमितितासामंजस्यमितिवदंति॥वस्तुतोगुरुधर्मस्यप्रतियोगितानवच्छेदकत्वेपारिभा
षिकावच्छेदकत्वंनिवेशनीयंतच्छरीरेयादृशस्वेनिविष्टतादृशधर्मेतरनिवेशोवन्हित्वादौविशिष्टव
न्हित्वादिभेदासत्वेनतादृशधर्माविषयकप्रतीतिविषयत्वंनिवेशनीयमितिगौरवमतःप्रतियो
गितावच्छेदकंयादृशयादृशरूपंस्वविशिष्टसंबंधिनिष्ठज्ञानावच्छिन्नप्रतियोगितावच्छेदकतत्कत्वरूपंत
त्तदतिरिक्तवृत्तित्वमेवानवच्छेदकत्वंतेनविवक्षणीयं॥तथाचसर्वासामेवदंडादिव्यक्तीनांहेतुस
मानाधिकरणज्ञानावच्छिन्नप्रतियोगितावच्छेदकतयाकस्याश्चिदपिदंडादिव्यक्तेर्नयावत्प्रतियोगिता
वच्छेदकातिरिक्तवृत्तित्वंस्वस्यस्वातिरिक्तवृत्तित्वविरहादितिखंडधर्मस्यव्यापकतावच्छेदक

तानुसरणं।तच्चरणोक्ताभिप्रायेणयथाश्रुतमूललक्षणमुपपादयेत्तुसार्वभौमप्रभृतिमनुसृत्य
कोक्त्यनादरेणानुगतरूपेणनानाव्यक्तिविधेयतावच्छेदककानुमित्यौपयिकव्याप्तिर्यद्रूपावच्छिन्नम
नवच्छेदकंयद्रूपंवाऽनवच्छेदकतानवच्छेदकंतद्रूपविशिष्टावच्छिन्नसामानाधिकरण्यंतद्रूपविशिष्टा
वच्छिन्ननिरूपिताव्याप्तिरसंवरीत्यानिर्वचनीया।तथासतिदंडिसंयोगादिहेतुकापिदंडिमानित्याका
रिकानुमितिविशेषदर्शिनामपिनिर्वहति।एवमेकोक्ताभावप्रतियोगिताधर्मिकोऽन्वयाभावघटिताया
ग्रंथकारेणस्वयमुपदर्शनीयायाव्याप्तेरपिदंडत्वादिविशिष्टदंडाद्यवच्छिन्ननिरूपितत्वनिर्वाहः॥
हेतुसमानाधिकरणविशेषाभावप्रतियोगितायांदंडत्वद्रव्यत्वव्याप्यजातित्वादिविशिष्टावच्छे
द्यत्वाभावस्यासमा[illegible]त्वात्।दंड्यादिसामान्याभावप्रतियोगितायामेवतद्धर्मविशिष्टनिरूपितवि

ण्यसाधारणरूपमुपेक्ष्यविशिष्टसामानाधिकरण्य

ग०घ०

लक्षणावच्छेद्यत्वसत्वादिति ध्येयं॥ इत्यं चेति। हेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यत्वेनसा-
मानाधिकरण्यनिवेशनेन चेत्यर्थः॥ नाव्याप्तिरिति। न विशिष्टसत्तात्वरूपहेतुतावच्छेदकवैशिष्ट्याव- विशिष्ट
गाहिज्ञानजन्यानुमित्यौपयिकव्याप्त्यनिर्वाह इत्यर्थः॥ तेन विशिष्टसत्तात्वाद्युपलक्षितहेतुमत्ता-
ज्ञानजन्यानुमित्यौपयिकव्याप्तेरुपलक्षितहेतुसामानाधिकरण्यमेव निविष्टमिति लभ्यते॥ अतो-
द्रव्यत्वाद्यभावेनाहत्यहेतुसामानाधिकरण्यसत्वान्नाहत्यहेतौ न द्रव्यत्वादेर्व्याप्तिरित्यभ्युपगतानां गुरु-
णामैदो विशिष्टसत्तात्वाद्युपलक्षितहेतुमत्ताज्ञानसंभवेपि तत्र द्रव्यत्वाद्यनुमित्यापत्तिः॥ यत्र घटपट- न
वृत्तिसंयोगत्वादिनाहेतुता पटपटाद्यन्यतरत्वसाध्यं तत्रोभयवृत्तित्वविशिष्टाधिकरणाप्रसिद्ध्या हे-
तुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यगर्भव्याप्त्यंतरमवश्यं स्वीकरणीयं॥ अन्यथा तद्धेतुकत-

विशिष्टवैशि
ष्ट्यावगाहि
बाधे

साध्यकानुमित्युच्छेदप्रसंगात्॥ इष्टत्वसाध्येतरानभ्युपगमे साध्यत्वपहेतुकानुमितिरुच्छिद्येत॥ तन्नेदसा
मानाधिकरण्यसहिततद्वृत्तिधर्मत्वरूपसाध्यत्वपत्वविशिष्टाधिकरणाप्रसिद्ध्या विशिष्टाधिकरणता-
गर्भस्यासंभवात्॥ अथैवं विशिष्टवैशिष्ट्यावगाहिज्ञाने विशिष्टनिरूपितसमवायस्य संबंधतया ते
न संबंधेन व्याप्तिर्हेतुतावच्छेदकसंबंधेन हेतुमत्त्वस्यापि विवक्षणीयतयैव निर्वहतीति कथमत्र वि
शिष्टपदोपादानं॥ नच विशिष्टनिरूपितसमवायादिना न विशेषणसंबंधता अपि तु शुद्ध एव सम-
वायादिर्विशेषणसंबंधः स्वविशिष्टनिरूपितसमवायादिस्तु विशेषणतावच्छेदकसंबंध इति मता
भिप्रायेणेदं॥ तथा चोक्तस्थलेपि हेतुतावच्छेदकसंबंधः शुद्धसमवाय एवेति हेतुतावच्छेदकसंबं
धमात्रविवक्षयानवतीकार इति वाच्यं॥ हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञाने हेतुतावच्छे-

ग० ध०

दकस्यपक्षेपरंपरासंबंधेनज्ञाननियेव्यापकताशरीरघटकाभावाधिकरणेपितदीयतादृशसंबं
धस्यनिवेशितत्वात्ततएवहेतुतःपक्षेसाध्यानुमितिनिर्वाहेविशिष्टत्वेनसत्त्वादेर्मत्वादिव्याप्ति
स्वीकारस्यनिरर्थकतापातात्॥नचदर्शितरीत्याविशिष्टव्यापकताग्रहस्यविशेषणव्यापकताव-
गाहित्वेपिविशिष्टपक्षधर्मताग्रहस्यविशेषणेतदवगाहित्वेपिचविशिष्टहेतुकपरामर्शस्यवि
शेषणेसाध्यसामानाधिकरण्यावगाहित्वानियमात्विशेषणहेतुकानुमितिसामग्र्याविशि न
ष्टहेतुकानुमितिपूर्वमावश्यकतेतिवाच्यं॥साध्येविशिष्टहेतोर्व्यापकताग्रहेपिविशिष्टहेतोःसा
ध्याविरोधग्रहसत्त्वेऽनुमित्यनुत्पत्त्याविशिष्टहेतुकस्थलेविशिष्टाधिकरणत्वघटितहेतुसाध्य
सामानाधिकरण्यविषयकस्यैवपरामर्शस्यानुमितिहेतुतावाच्या॥अन्यथाविरोधस्यजन-

ज्ञानाविरोधितयाहेत्वाभासत्वस्यदुर्घटताप्रसंगात्॥ तथाचसाध्यवतिविशिष्टहेत्वधिकरणत्व
ज्ञानेचविशेषणस्यपरंपरासंबंधस्यापितज्ज्ञाननियमेनविशिष्टहेतुकपरामर्शस्यनियमतो
विशेषणेपिसाध्यसामानाधिकरण्यावगाहित्वात्॥ मैवम्॥ विशिष्टनिरूपितव्यापकताशरीरेवि-
विशेषणा४ शेषणस्यधर्मिपारतंत्र्येणविशिष्टाधिकरणतयाप्रवेशः नतुस्वातंत्र्येणतथाचतद्ग्रहेनविशेषण
व्यापकतावगाहित्वनियमोनिर्वहतिविशेषणनिरूपितव्यापकतायास्तद्वन्निष्ठाभावप्रतियो-
गितावच्छेदकत्वत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावघटितत्वात्॥ विशिष्टवन्निष्ठाभाव
प्रतियोगितावच्छेदकत्वरूपप्रतियोग्यपरागेणाभावज्ञानेचविशिष्टवत्त्वांतर्गतविशेष्यवत्त्वपरित्या
गेनविशेषणवन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वेनप्रतियोगितावच्छेदकत्वपर्याप्तिज्ञानासं

गं० धा०

न्नत्वात्॥ अनावश्येति यो गिप्रकारघटकस्यानुपलक्षणतया ज्ञानानुपगमात्॥ न च परंपरासंबं
धेन विशेषणनिष्ठव्याप्यत्वावगाहिपरामर्शनिष्ठकारणताया अनपवादसिद्धत्वात्॥ विशिष्टहेतु
कपरामर्शान्तरकारणत्वाकल्पनप्रयुक्तलाघवानुरोधेन विशिष्टस्य व्याप्तिग्रहस्थलेऽधिकर
णस्य तेन रूपेण विशेषणतावत्त्वभानमुपगम्य विशेषणतावत्त्वभानमुपगम्यैव विशेषणे व्याप्तिज्ञानंक
ल्पनीयमिति वाच्यम् शब्दाधीनविशिष्टवत्त्वगर्भव्याप्तिग्रहस्थले तेन रूपेण विशेषणता त्वगर्भव्याप्तिज्ञा
नानियमात् तादृशव्याप्तिबोधकशब्दस्यैव तेन रूपेण विशेषणतावत्त्वावगाहकत्वात्॥ अथ तत्र तदु
त्तरं विशेषणे मानसव्याप्तिग्रहस्य वानुमित्यर्थकस्य ते तत्कारणतायाः क्लृप्तत्वादिति चेन्न। एवं
सति दंडघटपक्षितधर्मिहेतुकानुमितेर्विलयप्रसंगात्॥ तद्धेतुकव्याप्तिग्रहस्थले परंपरा

संबंधेनोपस्थितदंडादिव्याप्तिग्रहस्यकल्पनसंभवात्॥स्वातंत्र्येणसकलपरंपरासंबंधघटितसक
लविशेषणवत्वग्रहस्याप्रामाणिकतयाविशेषणहेतुकपरामर्शस्यकारणतायाः क्लृप्तत्वानि
यमाच्च॥ननुवह्निसंयोगिसंयोगाद्यात्मकसाध्यसामानाधिकरण्यस्यव्याप्तित्वेएकैवहिसाव्याप्ति
रितिम्हल्नस्मेथविरोधः॥महानसपर्वतादिनिष्ठधूमादिगतवह्निसंयोगादेरैक्यासंभवादित्यतआ संयोगि
ह॥सामानाधिकरण्यव्यक्तीनामिति॥भेदपीति॥अधिकरणभेदेनधूमादिभेदेनचेत्यादिः॥निरू
पकतावच्छेदकंवह्नित्वादिरूपसाध्यतावच्छेदकं॥अधिकरणतावच्छेदकंधूमत्वादिरूपहेतुता
वच्छेदकं॥तदैक्यात्साध्यहेतुभेदेप्यभेदात्॥तद्भेदेतात्पर्येणएवभाक्तएकत्वव्यवहारः॥ननु
लक्षणयातद्व्यवहारसमर्थनमसंगतं॥सामान्यव्याप्त्यासत्त्वेनावपक्षेविशिष्टपरामर्शनिर्वाह

ग०५०

र्थंव्याप्यैकस्यनात्तन्निर्वाहस्यसामानाधिकरण्यस्यव्याप्तित्वेधूमत्वादेरेकस्यापिपक्षीयधूमादिनिष्ठसा
मानाधिकरण्यस्यसामान्यप्रत्यासत्तिंविनापूर्वमग्रहासंभवेनतत्स्मरणासंभवात्॥पक्षीयधूमे
तदुपनयासंभवेनायोगात्॥अतोऽतिप्रसंगेनचधूमादिव्यापकवह्न्यादिसामानाधिकरण्यमा
त्रस्यव्याप्तित्वासंभवात्॥धूमत्वादिरूपहेतुतावच्छेदकस्यविधाव्याप्तिशरीरस्यावैकल्यंदर्शयन्नव्या निवेशाश्वेस्य
प्तेर्निर्दमनेदंचदर्शयति॥वस्तुतस्त्वित्यादिना॥प्रथमपक्षप्रदर्शनंतत्पक्षेधूमत्वत्वाद्यप्रवेशाद्व्याप
वेनसामान्यप्रत्यासत्तिंपक्षेतद्ज्ञानस्यैवानुमितिहेतुत्वमितिस्वनायरासभादिसाधारण्यादिति
॥तत्साधारण्येचव्यवत्वंविनापिरासभादिलिंगकवह्न्याद्यनुमानापत्तिरितिभावः॥अथव्यापकताप्रवि
ष्टहेतुतावच्छेदकधर्मितावच्छेदककसामानाधिकरण्यप्रकारकज्ञानस्यैवानुमितिहेतुत्वोपगमा

त्वायमतिप्रसंगः॥ धूमत्वादिप्रकारेणानासमानेरासभादौ साध्यसामानाधिकरण्यग्रहस्य धूमत्वा
धेरेऽत्वमत्वानियमात्॥ वक्ष्यमाणधूमत्वादिमत्त्विशिष्टवह्न्यादिसामानाधिकरण्यस्य आहित्वेपि तद्ध
र्मितावच्छेदकतापन्नहेतुतावच्छेदकविशिष्टवत्त्वाज्ञानस्य हेतुतापावश्यकत्वात्॥ अन्यथा विशि
ष्टसत्त्वादिव्यापकद्रव्यत्वादिनिरूपितविशिष्टसत्त्वादिनिष्ठसामानाधिकरण्योपलक्षितवत्त्वाज्ञा
नाद्गुणरूपपक्षेऽप्यांतस्य द्रव्यत्वाद्यनुमानापत्तेः॥ साध्यसामानाधिकरण्यविशिष्टवत्त्वस्य पक्षे
साध्यनिश्चयं विनादुर्निश्चयतया तदुपलक्षितवत्त्वानिश्चयस्याप्यनुमितिहेतुताया उपगंतव्य
त्वात् केवलसामानाधिकरण्यप्रकारेण पक्षधर्मताज्ञानस्यानुमितिहेतुत्वे धूमाद्यावद्वान्पक्ष
इत्यादिसिद्धिमहदशायामपि साध्येधूमादिव्यापकताज्ञानादप्यनुमित्यापत्तेश्च॥ असमानप्रकार

दिशा[redacted]नाविरोधित्वात् (स्यं) धूमत्वादिमतिसामानाधिकरण्यमित्यस्य धूमत्वादिविशिष्टविशेषणतापन्नंसामानाधिकरण्य

गं॰ध॰

कतयाधूमाभाववान्पक्ष इत्यादिबुद्धेर्धूमवह्निसामानाधिकरण्यपर्वते[redacted]पक्षस्सौमित्यर्थो नतुधूमा द्वा
दिवृत्तित्वविशेषितेसामानाधिकरण्यमितितथाचधर्मिविशेषणतापन्नधूमत्वादिरूपहेतुतावच्छेदक
सामानाधिकरण्येनान्वयव्याप्तिरितिपर्यवसितः कारणंचधूमव्यापकवह्निसमानाधिकरणधूमवान्
पर्वतइत्यादिरेवपरामर्शः॥ तावतैवोक्तोन्वयस्यहेतुविशेषणतयानुमितिजनकज्ञानविषयत्व
रूपव्याप्तित्वनिर्वाहः॥ द्वितीयपक्षेचधूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्ववद्धूमवान्
पर्वतइतिज्ञानेहेतुः॥ नतुस्वरूपतोधूमत्वाप्रकारकंतादृशधूमत्ववत्वान्पक्षइत्याकारकंतादृश
ज्ञानस्य धूमाभाववान्पक्षइत्याकारिकासिद्धिज्ञानाप्रतिबध्यत्वात्॥ एतन्मतेचहेतुतावच्छेदक
वृत्त्यसाधारणधर्मावच्छिन्नसाध्यसमानाधिकरणवृत्तित्वमेवविरोधः॥ नतुहेतुतावच्छेदकावच्छि

२ कु धूमवत्तः ध्वप्रकारि

त्वेसाध्यसामानाधिकरण्यंतत्प्रदर्शितज्ञानस्यहेतुतावच्छेदकेधर्मितावच्छेदकीकृत्यसाध्यसामानाधि
करण्यानवगाहितयातथाविधविरोधज्ञानाप्रतिबध्यत्वात्॥यदिविरोधस्यानुमितिप्रतिसाक्षाद्वि
रोधितयाहेत्वाभासत्वमुपपादयितुंशक्यतेतदासमानाधिकरणवृत्तित्वांशेनिर्धर्मितावच्छेदकेस-
मानाधिकरणवृत्तिमद्धूमवान्पर्वतइत्येतादृशमपिज्ञानंहेतुरुपेयतेऽन्यथाधूमत्वत्वादिविषयि
तायाःकारणतावच्छेदककुक्षौप्रवेशेगौरवात्॥सामानाधिकरण्यप्रकारकत्वापेक्षयासमानाधि-
करणवृत्तिप्रकारकत्वस्यगुरुत्वेपिसामान्यस्याप्रत्यासत्तित्वविशिष्टपरामर्शनिर्वाहानुरोधेन
तेनरूपेणहेतुतायाभ्युपगत्योपगमात्॥अथाहेतुतावच्छेदकधर्मविशिष्टसाध्यसामानाधिकरण्यप-
रूपाणिचेति॥प्रतिधूमादिकमित्यादि॥॥द्वितीयासाध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकरूपा

॥अनिर्वाससर्वधर्मसाधारणी॥ अनुगतरूपावच्छिन्ननानाव्यक्तिदंडादिविशिष्टहेतुस्थलेपिपरंपरा
संबंधेनदंडत्वाद्यवच्छिन्नधर्मेणैवहेतुतावच्छेदकतयानुपगंतव्यइतिनार्थः॥ पक्षपिसाध्यसामानाधि व
करण्यावच्छेदकरूपवक्ष्यमाणव्याप्तिप्रायेणापिरत्नकोशकारीत्यादिग्रंथःसंगच्छतेतथापिस्वयंत
त्रस्वरूपसंबंधरूपावच्छेदकत्वप्रवेशस्यावश्यखंडनीयतयास्वविशिष्टाधिकरणावृत्तिपावत्सा
ध्यसमानाधिकरणकत्वरूपपारिभाषिकावच्छेदकत्वस्यैवचविवक्षणीयतयातदपेक्षयाता
दृशीव्याप्तिर्गुरुशरीरेतिकथंचिदीदृशव्याप्तेरेवोपपत्तिसंभवेनतज्ज्ञानमनुमितिहेतुरित्येतादृशव्या
प्तेरेवमुपपादितं॥ मिश्रादिमतमवलंब्यप्रतियोग्यसमानाधिकरणपदप्रयोजनमाह॥ अपेक
पिसंयोगीति॥ अथैतद्वृक्षत्वादेरव्याप्यवृत्तिकपिसंयोगादिव्याप्यतोपगमेकपिसंयोगाद्यनव

छेदकमरणादेःपक्षतावछेदकत्वेतदवछेदेनापिएतद्वृक्षादौकपिसंयोगादेःसिद्धिप्रसंग॥नचेष्टा
पत्तिः॥सल्लिंगपरामर्शस्यैवत्रमानुमित्युजनकत्वनियमात्॥नचतदवछेदेनहेतुमत्ताज्ञानस्यतद
वछेदेनसाध्यानुमितिहेतुत्वादेतद्वृक्षत्वादिरूपे॥५॥वृत्तिहेतोरप्यकिंचिदवछेदेनावृत्तेर्नातिप्र
संगइतिवाच्यं॥यदिस्वरूपसंबंधरूपावछेदकतावगाहिन्यामनुमितावपितादृशहेतुमत्ताज्ञा
नत्वेनहेतुत्वमुपेयते॥तदापितुल्ययुक्त्याएतद्वृक्षत्वादेरिवमूलाद्यवछिन्नसंयोगादिविशेषस्या
पिकपिसंयोगादिसाध्यतयातेनहेतुनामूलाद्यवछेदेनकपिसंयोगाद्यनुमितेर्निष्प्रत्यूहत्वादिति
चेत्॥अत्रोपाध्यायाः॥साध्यस्यपक्षतावछेदकसामानाधिकरण्यंविनाव्याप्यस्यपक्षधर्मत्वम
नुपपन्नमितिपक्षधर्मताबलात्पक्षतावछेदकसामानाधिकरण्यमेवसाध्येसिध्यतिनतुतद

ग०ध०

वछेदकत्वमपिप्रमाणाभावादितितादृशानुमितेरप्रामाणिकतयातत्परामर्शहेतुताकल्पनमेव
नास्तीतिनतथापत्तिरितिसमादधिरे॥मिश्रास्तु॥बाधानवतारेमूलावछेदेनकपिसंयोगादि
त्तिविशिष्टेवेतिवदंति॥एतत्तत्वंग्रथकृताहेत्वाभासेवक्ष्यते॥प्राचीनमित्यस्यावृत्तिस्थलंदूषयि
तुमुपन्यस्यति॥पत्त्विति॥तत्॥असमानाधिकरणांतं॥ननुवृक्षेसंयोगत्वावछिन्नाभाववत्वेप्यव्या
प्यसत्वएवावछेदकतानोक्तलक्षणाव्याप्तिःप्रसज्यततदेवनवृक्षादौसंयोगानवछेदकतायाप्र
सिध्यातत्सामान्याभावावछेदकस्यदुर्लभत्वात्॥गगनाभावादीनांसर्वेषामेवतत्तत्संयोगाव
छेदकत्वात्॥अभावस्तुप्रतियोग्यनवछेदकावछेदेनैवववर्तेनतुतदवछेदेनापिविरोधादिति ते
तन्नाहासंयोगस्येति॥वृक्षत्वावछेदेनेति॥वृक्षत्वादेःप्रत्येकंसकलसंयोगातिप्रसक्तत्वान्नसंयो

गावच्छेदकत्वासंभवात्॥आकाशादिसंयोगस्यापियावद्वृक्षवृत्तेरेकस्याभावाद्वृक्षत्वेतत्संयोगानतिप्रस
क्तत्वासंभवादितिभावः॥ननुवृक्षत्वावच्छेदेनवृक्षादौसंयोगसामान्याभावसत्वेवृक्षेसंयोगोनास्ती
त्यादिप्रत्ययस्यापत्तिरित्यतआह॥तत्रचेति॥अतीन्द्रियस्येति॥अतीन्द्रियप्रतियोगिकतयासंयोग
सामान्याभावस्यातीन्द्रियत्वमितिभावः॥ननुसंयोगसामान्याभावस्यवृक्षेसत्वेमहदुद्भूतरूपवन्मा
त्रसमवेतसंयोगसामान्याभावोप्यावश्यकः॥तथाप्यधर्मावच्छिन्नाभावस्यतद्धर्मावच्छिन्नाभावनि
यतत्वादितियोग्यमात्रप्रतियोगिकोयमभावःकथंनवृक्षेसाक्षात्क्रियतेइत्यतआह॥परितइति॥
प्रतियोग्युपलब्धेर्विभिन्नावच्छेदेनाभावग्रहंप्रतिविरोधिज्ञानमुद्रयाप्रतिबंधकत्वनसंभवतीति
तस्यदोषविधयाप्रतिबंधकत्वलाभाय॥अथतत्रसंयोगाविषयकमेवोपनीत[illegible]घन्यकेवृक्षादि

रूपाधिकरणज्ञानंतदग्निमक्षणेहस्तादौतादृशसंयोगसामान्याभावप्रदप्रसंगः॥तादृशादोषस्य-
भागसत्वात्॥एवंहस्तेनसंयोगइत्यादिलौकिकप्रत्यक्षस्यालीकतयातत्रतादृशप्रतिबंधकत्वक
ल्पनमेवाशक्यमितिचेन्न॥हस्तादौसंयोगसामान्याभावलौकिकप्रत्यक्षस्याप्रसिद्धत्वेपिगुणादौत
त्प्रसिद्ध्याऽधिकरणीयविषयतासंबंधेनाभावलौकिकत्वावच्छिन्नप्रतिस्वविषयसंयोगवत्वसंबं-
धेनप्रत्यक्षत्वेनप्रत्यक्षत्वेनप्रतिबंधकत्वकल्पनात्सर्वत्रद्रव्यअंततईश्वरीयप्रत्यक्षस्यैवसर्वदाता-
दृशसंबंधेनसत्वेनातिप्रसंगविरहात्॥इदमापाततः॥द्रव्यरूपाधिकरणविषयकसंयोगाभावावि
षयकप्रत्यक्षस्यकदाचिद्दोचिदप्यनुदयेनतादृशप्रत्यक्षसामग्र्याएवाकल्पनेनापादकाभावादेवा व
रणासंभवेनतादृशप्रतिबंधकताकल्पनस्यायुक्तत्वात्॥कथंचिदापत्तिसंभवेपितादात्म्यसंबंधेनद्र

सत्वेनैवतादृशसंबंधेनसंयोगाभावस्यलौकिकप्रत्यक्षंप्रत्यक्षंप्रतिप्रतिबंधकत्वौचित्यात्।मानाभावादि
ति।।लौकिकप्रत्यक्षस्ययोग्यानुपलब्धिविरहेणासत्वादुपनीतभानस्यसंयोगाभावोवृक्षावृत्तिरित्या
कारकविपरीतविषयकस्याप्युपनयवशेनसत्वाद्विनिगमनाविरहेणैकतरस्यप्रामाण्यासिद्धेः १
रोशब्दस्याप्तोक्तत्वासिद्ध्यातदव्यवस्थापकत्वात्अनुमानस्यचलिंगाभावेनासत्वादितिभावः।।न
नुवृक्षादौयावत्संयोगविशेषाभावानामुभयसिद्धतयातत्रावकेतोस्तत्राप्रत्यक्षस्यापितत्सामान्या
भावस्यसिद्धिर्निष्प्रत्यूहैवेतिशंकांनिरस्यति।नचेत्यादिना।यः।संयोगीयद्यावद्विशेषाभाववान्ससं
योगसामान्याभाववानितिव्याप्तेरेवाग्रेव्यर्थविशेषणत्वाप्रयोजकत्वादिदोषेणनिराकरणीयत्वे याप्रथम २
नःसामान्यमुखव्याप्तिमनुमानोपष्टंभकतयादर्शयति।।योयदीयेति।यद्धर्माश्रयस्ययावद्विशेषाभा

गदा०

वान्वयःसतद्धर्मावच्छिन्नाभाववानित्यर्थः॥संयोगत्वाश्रयस्यविशेषधर्मावच्छिन्नाभावकूटंद्रव्यादौवर्त्त
तइतितद्वैलक्षण्यात्संयोगत्वावसिद्धिः॥प्रतियोगिनोयत्वतत्त्वेननिवेशेसंयोगवृत्तिकपिसंयोगत्वादि मो
रूपसामान्यधर्मावच्छिन्नाभावमादायसिद्धसाधनंस्यादितिधर्मस्ययत्वतत्त्वेनोपादानं॥संयोगादिसं
बंधावच्छिन्नसंयोगत्वावच्छिन्नाभावमादायसिद्धसाधनवारणायसमवायसंबंधावच्छिन्नाभावएवसा
धनीयः॥अन्यसंबंधावच्छिन्नविशेषाभावकूटस्यतत्संबंधावच्छिन्नसामान्याभावव्यभिचारित्वेसम
वायसंबंधावच्छिन्नविशेषाभावकूटस्यापितत्संबंधावच्छिन्नसामान्याभावव्यभिचरितत्वंतुल्यन्या
येनसंभाव्येतइतिप्रतियोगितावच्छेदकसंबंधानामपियत्वतत्त्वेनव्यासाशावंतर्भावः॥अतएवसम
वायसंबंधावच्छिन्नयावद्विशेषाभावहेतुनातत्संबंधावच्छिन्नसंयोगसामान्याभावसिद्धिः॥पक्षमात्र

यविशेषाभावश्चतन्नयावृत्तियद्धर्मसमानाधिकरणधर्मावच्छिन्नाभावः॥ अतःसंयोगत्वाद्यपेक्षया
वृक्षवृत्तिसंयोगत्वादेर्विशेषधर्मत्वेपिसंयोगसामान्याभावेवृक्षादावनभ्युपगच्छतांअवयवविशे
षरूपावच्छेदकदुर्निक्षेणवृक्षवृत्तिसंयोगत्वावच्छिन्नाभावस्यवृक्षादावनभ्युपगमेपिनसंदिग्धासि
द्धिर्वृक्षवृत्तिसंयोगत्वादीनामुन्नयवृत्तित्वेनतदवच्छिन्नाभावस्यावृत्तेः॥ नन्वेवंहेतावुन्नयावृत्तित्ववि
शेषणस्यासिद्धिवारकत्वेपिव्यभिचारावारकतयावैयर्थ्यं॥ यावत्त्वविशेषणस्यधी॥ विशेषविषयत्वरू
पस्यपरिचायकमेवतादृशधर्मावच्छिन्नप्रतियोगिताकत्वंनतुहेतुप्रविष्टमितितुनसत्॥ तथास
तियत्तत्पदार्थस्यहेतुसाध्यशरीराप्रवेशेनसामान्यव्याप्तित्वानुपपत्तेरितिवाच्यं॥ यावत्पदस्यव्या
पकत्वार्थकतयातद्धर्मसमानाधिकरणोन्नयावृत्तिधर्मावच्छिन्नाभावत्वनिरूपितायाआधेयत्वसं

गदा॰

बंधावच्छिन्नव्यापकतायाएवहेतुतयाविशेषधर्मव्यापकत्वाघटकाभावांतरस्यैवचसामान्यधर्मव्याप
कताघटकतयावैयर्थ्यानवकाशात्॥नचतादृशाभावत्वव्यापकतादृशाभावनिष्ठभेदप्रतियोगिता स्वै
यामाधेयतासंबंधेनानवच्छेदकत्वएवंचसंयोगविशेषाभावानांसर्वेषामेवसर्वाधिकरणवृत्तितयात
न्निष्ठभेदप्रतियोगितायामाधेयतासंबंधेनावच्छेदकत्वमप्रसिद्धमितितदनवच्छेदकत्वरूपत्वेन मधिक
प्रसिद्धिरितिवाच्यं॥आधेयतासंबंधावच्छिन्नावच्छेदकतासंबंधेनप्रतियोगितायाश्चाभावस्यैवप्र
तियोगितानवच्छेदकत्वस्थानेनिवेशनीयत्वात्॥तत्कस्यचिदधिकरतादृशसंबंधावच्छिन्नाभाव ण
मोलम्भात्॥यद्धर्मसमानाधिकरणेत्यत्रप्रतियोगितावच्छेदकत्वेनधर्मोविशेषणीयः॥तेनकंबु
ग्रीवादिमाप्यधर्मावच्छिन्नप्रतियोगिताकयावदभावाभाववत्त्वधर्मावच्छिन्नाभावाप्रसिद्ध्यातादृ

शाभाववत्वासंभवेपिनक्षतिः॥नचभेदप्रतियोगितावच्छेदकवाच्यत्वघटान्यतरत्वादिव्याप्यधर्मा-
वच्छिन्नसंयोगादिसंबंधावच्छिन्नप्रतियोगिताकयावदभाववतस्तत्तद्रूपावच्छिन्नप्रतियोगिताका-
भाववत्वासंभवाद्व्यभिचारः॥वाच्यत्वादेःसंयोगादिनावृत्तित्वात्तेनसंबंधेनघटादेरेवतादृशाभाव-
घटत्वादेरेव विरोधितयातत्प्रतियोगितावच्छेदकत्वसंभवेनगुरोरन्यतरत्वस्यतत्प्रतियोगितानवच्छेदकत्वादि-
तिवाच्यं॥वाच्यत्वादिसाधारणस्यान्यतरनिष्ठप्रतियोगित्वस्यन्यूनवृत्तिघटत्वादिनाऽनवच्छेदा-
दगत्यागुरुणाऽन्यतरत्वादिनैवतदवच्छेदात्॥वस्तुतोयत्संबंधावच्छिन्नप्रतियोगिताकाभावस-
साध्यहेतुघटकतातत्संबंधावच्छिन्नप्रतियोगितावच्छेदकत्वेनैवसमानधर्मस्यविशेषणीयत-
याउक्तसामान्यधर्मस्यभेदप्रतियोगितावच्छेदकत्वेपिसंयोगादिसंबंधावच्छिन्नप्रतियोगितानवच्छे

दकतयातत्संसर्गसंबंधावच्छिन्नतदवच्छिन्नाभावाप्रसिद्धावपिनव्यभिचारः॥अतएवनेदंप्रतियोगिता
वच्छेदकजातित्वादिघटकनित्यत्वादेःसमवायसंबंधावच्छिन्नप्रतियोगितावच्छेदकगर्भेनिवेशस्य वे
गौरवेणासंभवेपिजातित्वादिसामान्यधर्मघटितहेतोर्व्यभिचारितयासामान्यव्याप्तिभंगः॥वस्तु
तस्तुन्यूनधर्मेप्रतियोगितावच्छेदकत्वविशेषणमनुपादेयमेव॥कंबुग्रीवादिमत्त्वसमानाधिकरणोन
यावृत्तिधर्मावच्छिन्नाभावनिष्ठनेदंप्रतियोगितात्वस्यघटत्वादिघटिततादृशधर्मापेक्षयागुरुतया
तयातदवच्छिन्नाभावरूपव्यापकत्वाप्रसिद्धेर्यद्धर्मेत्यनेनकंबुग्रीवादिमत्वरूपगुरुधर्मोपादानस्यगुरु
धर्मस्याभावप्रतियोगितानवच्छेदकत्वपक्षेसत्त्वेनव्यभिचारानवकाशात्॥अभावेपावत्वादिविशेष
णप्रवेशस्याकिंचित्कात्वादिव्यक्त्यभाववतिजात्यादिसामान्याभावासत्वेपिनसामान्यव्याप्तिभंगः॥

यद्यपियत्तदर्थघटितसाध्यहेतूनामननुगमेननैकाव्याप्तिरितिसंयोगसामान्याभाववत्तदीयविशेषाभाव
कूटयोर्व्याप्तौयावत्त्वादिविशेषणवैयर्थ्यमेवतथापिगतदोषस्यस्वयमग्रेवाच्यतयायथाकथंचिच्छंका
संगतिः॥अथवृक्षादौयावत्संयोगाभाववत्त्वमुन्नयवाद्यसिद्धं॥तत्रविभुसंयोगाभावावच्छेदकस्यावयव
विशेषस्यदिग्विशेषस्यवादुर्वचत्वात्।ध्वंसप्रागभावयोरत्यंताभावविरोधित्वेकालविशेषावच्छेदेना-
पितच्चतदभावासत्त्वात्॥तयोस्तदविरोधितामतेऽप्येसंयोगसामान्याभावस्याप्युत्पत्तिकालावच्छेदे
नतत्त्वाभावविरोधात्॥नचमूलाद्याद्यवच्छिन्नविभुसंयोगव्यक्तौनानाभेदादग्रमूलाद्यवच्छेदेनाभावःसुल-
भइतिवाच्यंतासांभेदस्याप्रामाणिकत्वात्॥नचनानावयवावच्छिन्नसंयोगव्यक्तौनाभ्यभेदेतत्तत्संयो-
गव्यक्तौतत्तदवच्छेदकव्यक्तौनानातादात्म्यसंबंधेनकारणतायांव्यभिचारइत्यवच्छेदकभेदेनसंयोग-

नेदं नरस्याव्यापकः ।। व्यापकस्यावच्छेदकत्वं व्यक्तीनां विशिष्य स्वावच्छिन्नसंयोगव्यक्तिषु हेतुतानुपग
मः ।। अन्यथा मूलादिमात्रावच्छिन्नमूर्तान्तरसंयोगानामग्राद्यवच्छेदेन तद्वृक्षादिवृत्तिविभुसंयोगानां वृ
क्षान्तरावयवावच्छेदेनोत्पत्तिप्रयोजकस्य दुर्वारत्वापातादिति वाच्यम् ।। व्याप्यवृत्तेरवच्छेदकानुपर
गमेन वृक्षादौ विभुसंयोगस्याव्याप्यवृत्तितया मूलाद्यवच्छिन्नत्वविरहेण तत्र मूलादीनां हेतुताविर
हात् ।। व्याप्यवृत्तेरवच्छेदकोपगमे तत्तदवच्छेदकस्वरूपतत्तन्निष्ठावच्छेदकताव्यक्तीनामेव तत्तद
वच्छेदकस्य जन्यतावच्छेदकसंबंधतया मूलाद्यवच्छिन्नविभुसंयोगव्यक्तीनां तत्त्वेऽपि व्यभि
चारानवकाशात् ।। अन्यथा मूलाद्यवच्छिन्नसंयोगस्यादिस्वविशेषैरप्यवच्छिन्नतया तत्रावच्छेदकता
संबंधेन तत्तत्संयोगव्यक्तीनामुत्पत्तामूलादेस्तत्र व्यभिचारस्य दुर्वारत्वात् ।। न च मूलावच्छिन्नसंयो

योगानां कुम्भावच्छिन्नसंयोगादेरवश्यं प्राच्याद्यवच्छिन्नसंयोगादेरपि भेदः स्वीकर्त्तुं शक्यते॥ मूले प्रा
च्यां शरीरवृक्षसंयोग इत्यादिप्रतीत्या एकसंयोगव्यक्तावेव मूलप्राच्याद्यवच्छिन्नत्वावगाहनात्।
न च प्राग्मूलयोः शरीरसंयोग इत्यस्मादृशतादृशप्रतीतेरपि संयोगद्वयावगाहित्वमस्मदनुमतं इ
ति वाच्यं। यत्र मूलप्रतीचीमात्रावच्छिन्न एकः शरीरसंयोगः अग्रप्राचीमात्रावच्छिन्नश्च शरीरां यत्र
तरसंयोगस्तत्र मूले प्राच्यां शरीरसंयोग इति प्रत्ययापत्तेः॥ शरीरतरुसंयोगव्यक्तीनां एकैका
सामेव शरीरावयवेन वृक्षावयवेन चावच्छिन्नतया व्यभिचारस्यापि दर्शितसंबंधसंकोचमंत
रेण दुर्वारत्वाच्च॥ तत्तदवच्छेदकावच्छिन्नत्वमेव तत्तदवच्छेदकजन्यतावच्छेदकं॥ न तु संयोगनि
ष्ठतत्तद्व्यक्तित्वं॥ अनंतकार्यकारणभावप्रसंगात्॥ तथा चैकावच्छिन्नसंयोगस्यापरावच्छेदका
नहि तत्र शरीरावयवावच्छिन्नशरीरतरुसंयोगमूलावच्छिन्नतदुभयसंयोगयोर्भेदसंभवः तथा सति मूलावच्छिन्न
१ वृक्षसंयोगस्य शरीरे चरणावच्छिन्नशरीरसंयोगस्य वृक्षेऽव्याप्यवृत्तितया न दभावो सत्यप्रसंगात् तन्न दवच्छेद २
कावच्छिन्न नानासंयोगराधारण॥

वच्छिन्नत्वेपि देतेवच्छिन्नत्वविशिष्टस्यनाम्नेवोत्पत्तिरितिनव्यभिचारशंकेत्यपिवदंति ॥ यत्तु संयोग-
मात्रस्याव्याप्यवृत्तितासिद्धांतानुरोधेनमूलाद्यवच्छिन्नतरुवृत्तिसंयोगादौ नान्येदस्वीकारस्यावश्य-
कइति ॥ तदपिनसम्यक् ॥ ताहृशसंयोगव्यक्तीनांगगनादौ दिग्विशेषरूपावच्छेदकनियमेनैवता-
दृशसिद्धांतसंगतेः ॥ स्रग्ववदंति ॥ द्रव्यमात्रएवसंयोगसामान्याभावस्याश्रासौमाणिकतायास्त-
न द्रव्येत्यादिनोक्तेर्नचैतस्यादिनागगनादेरेवसंयोगसामान्याभावसाधकमनुमानमाशंकितेविभुद्र-
यसंयोगानभ्युपगमेनतत्रयावत्संयोगव्यक्तीनामेवभावातिनियतदिग्विशेषावच्छिन्नतयातत्र
घक्तित्वेनतत्रतदभावसत्वेऽविवादात्तनासिद्ध्यवकाशः ॥ विभुमात्रेसंयोगसामान्याभावसिद्धावपि
संयोगाद्रव्यत्वादित्यादौव्याप्तिसंगतेर्हेत्वादावेवत्वंतत्स्यातिबलात्संयोगसामान्याभावासिद्धावपि

तस्या

रक्षति॥ प्रतियोग्यनवच्छेदकस्य तदभावावच्छेदकत्वनियमसत्त्वे वृक्षत्वावच्छेदेन वृक्षादावपि संयोग-
सामान्याभावसिद्धेः सत्त्वेन तत्रापि तदभावं साधयतां तादृशनियमवादिनामाशंकां न च प्रतियोग्य-
नवच्छेदकवृक्षत्वादेरभावावच्छेदकत्वमित्यादिना निराकरिष्यति॥ एवमपि वृक्षत्वावच्छेदेन संयो-
गसामान्याभाववत्त्वे विरोधमात्रेण प्रतियोग्यनवच्छेदकस्याभावावच्छेदकत्वनियमेन वा सेद्धुमर्हती-
त्याशयेनैव वृक्षादौ संयोगतत्सामान्याभाववयोर्वृत्त्यनवच्छेदकत्वेनोपपादितः॥ न तु यो यदीयसा-
दिनियमस्य तत्साधकत्वाशयेनेति न सन्दर्भविरोध इति॥ यत्तु यत्किंचिदवयवनाशान्महावृक्षना-
शान्महावृक्षनाशानन्तरं खण्डवृक्षोत्पत्तिस्तत्क्षणे पूर्वोत्पन्नक्रियातोऽवस्थितयावत्तदवयवैर्गग-
नादिसंयोगानां विनाशः॥ द्वितीयक्षणे च खण्डवृक्षस्यापरावयवनाशस्तृतीयक्षणे च तन्नाशस्तत्र

वृक्षेन संयोग इति प्रत्यक्ष[illegible]तं

वृक्षेविभुसंयोगानुत्पत्त्यायावद्विशेषाभावसोलभ्यं॥नन्वेवंतादृशवृक्षेमूर्त्तान्तरेणापिसंयोगस्तदवयवसं
योगेस्तत्कर्मणाभावानसंभवति॥तदवयवगगनादिसंयोगनाशककर्मणामूर्त्तान्तरतदवयवसंयो
गानामपितदुत्पत्तिकालेविनाशात्तदवयवविभोःसंयोगानभ्युपगमेनस्वावयवद्वयसंयोगेनसं
योगद्वयजननासंभवात्॥उत्पत्तिकालेचद्रव्येगुणवत्कर्मसत्त्वानुपपत्तेरितिसंयोगसाध्यकेद्र
व्यत्वस्यसद्धेतुतैवननिर्वहतीतिवाच्यं॥तादृशखण्डद्रव्येतदवयवसंयोगजन्यस्यतत्कर्मजन्यस्यचसं
योगस्यासंभवेपिसर्वत्रैवसदागतिशालिपवनादिपरमाणूनांकर्मान्तिस्तत्तत्संयोगानामुत्पत्तौबा
धकविरहेणद्रव्यस्यसंयुक्तत्वनियमादित्यपिकेचित्॥यावत्संयोगाभावएवमानमितिज्ञायमा
नलिंगस्यानुमितिकरणत्वमताभिप्रायेण॥यत्तदर्थयोरिति॥साध्यहेतुघटकयत्तच्छब्दार्थयोःसं

योगत्वघटत्वाद्योरित्यर्थः ॥ अननुगमादिति ॥ ॥ - ॰ पेणनिवेशासंभवादित्यर्थः ॥ ॥ ॥ कव्याप्तेर्निर्वह्नि-
पितुमशक्यत्वादितिशेषः ॥ तथाच घटत्वावच्छिन्नाभावघटादिविशेषाभावकूटयोर्व्याप्तेः संयो-
गसामान्याभावसिद्धावनुपयोगित्वाद्यावत्संयोगविशेषाभावेसंयोगसामान्याभावीयविशेषव्याप्तेः-
श्चाग्रेनिराकर्त्तव्यत्वात्तेनाक्रान्तानुमानसंभवइतिभावः ॥ ननुप्रकृतहेतौप्रकृतसाध्यव्याप्तेरग्रहेऽपि
यथायोयत्रप्रवर्त्ततेसकार्यतयातज्जानातीतिव्याकारतस्तनपानादिप्रवृत्तितद्विषयककार्यता-
ज्ञानयोर्व्याप्तिग्रहात्गवानयनादिप्रवृत्तिरूपलिंगेनगवानयनादिकार्यताज्ञानस्यसिद्धिः ॥ तथाप्र-
कृतेसंयोगीययावद्विशेषाभावेतत्सामान्याभावव्याप्तेर्व्यर्थविशेषणत्वादिनाऽग्रहेऽपिघटादिविशे-
षाभावकूटेतत्सामान्याभावव्याप्तिग्रहादेवसंयोगीययावद्विशेषाभावेपक्षधर्मताज्ञानाद्दर्शनादौसं ग

गदा०

योगसामान्याभावसिद्धिर्दुर्वारैवव्यतिरेकिहेतुकानुमितावैवसामान्यव्याप्यधीनविशेषसिद्धौव्याप्तिवि
शिष्टपक्षधर्मताज्ञानस्यहेतुत्वानुपगमात्॥नचविशेषाभावांतरेसामान्याभावांतरव्याप्तिग्रहात्संयो
गविशेषाभावेनसामान्याभावसिद्ध्युपगमेपावत्वाद्यविशेषितकपिसंयोगादिप्रतियोगिकाभावेक
पिसंयोगादिसामान्याभावव्याप्तिग्रहादेवसंयोगादिप्रतियोगिकाभावेनतत्सामान्याभावसिद्धिसं
भवात्पावत्वादिविशेषणमनर्थकं॥प्रकृतहेतुतुल्यनिखिलहेत्वंतरेषुप्रकृतसाध्यतुल्यसाध्य
व्याप्तिग्रहापेक्षायाःस्वीकर्तुमशक्यत्वात्तादृशसकलहेतुसाध्यानांयुगसहस्रेणापिसंग्रही प्प
तुमशक्यत्वादितिवाच्यं॥उपस्थितयावत्तादृशहेतुषुतादृशतत्तत्साध्यव्याप्तिग्रहापेक्षयासा
मंजस्यात्तावन्मात्रापेक्षायाश्चतत्तत्साधनधर्मिकतत्तत्साध्यव्याप्तिग्रहाभावविशिष्टतत्तत्सा

ध्यसाधनोपस्थितेरनुमितिप्रतिबंधकतयासूपपादत्वात्॥ एवंसतियावत्त्वविशेषणानुपादानेज्ञाना
दिविशेषघटत्वापन्नावेज्ञात्वादिसामान्याभावव्यभिचारोपस्थितिदशायांसंयोगादिसामान्याभावसा
धनासंभवेनतादृशविशेषणसार्थक्यात्॥ गगनाद्यवृत्तिस्वसमानाधिकरणनिरुक्तधर्मावच्छिन्नप्र
तियोगिताकयत्किंचिदभावकंयद्यत्त्वंतत्तदन्योयोधर्मःस्वतन्निष्ठाभावप्रतियोगितावच्छेदकइत्ये
तादृशरूपोक्तसामान्यव्याप्तिस्थलाभिषिक्तव्याप्यैवंरूपवासंयोगत्वादौगगनादिनिष्ठाभावप्रतियोगि
तावच्छेदकत्वंसाधनीयं॥ तत्रचनाननुगमोदोषइत्याशंक्यउक्तानुमानेउपाधिमाह॥ एकावच्छेदे
नेति॥ अनवच्छिन्नतदीययावद्विशेषाभावाधिकरणत्वस्यउपाधित्वादित्यर्थः॥ यथाश्रुतेगुणादि
निष्ठौयावत्संयोगाभावाधिकरणतायाव्याप्यवृत्तितयाऽनवच्छेदकविरहेणउपाधेःसाध्यव्यापकता

वेद्यतां

गदा॰

ऽनिर्वाहात्॥ न च गुणादिनिष्ठायाः यावत्संयोगाभावाधिकरणतायाः व्याप्यवृत्तित्वेऽपि गुणत्वावच्छि
न्नत्वमावश्यकं॥ अन्यथा अधिकरणतावच्छेदकप्रकारकज्ञानासंभवेन गुणादौ तदभावग्रहासंभ
वादिति वाच्यं॥ द्रव्यनिष्ठयावत्संयोगाभावाधिकरणतायाः अपि द्रव्यत्वादिरूपेणावच्छेदेन तयापा दृश्यावच्छि
धेः साधनाव्यापकतानिर्वाहाय सप्तमीनिर्देश्यपदव्याप्यवृत्तितानिर्वाहकं विलक्षणमवच्छेद्यत्वं त
स्यैव विवक्षणीयतया गुणादिनिष्ठसंयोगध्वंसाभावाधिकरणतायां तादृशावच्छेद्यत्वविरहेण साध
व्यापकताया यथाश्रुते दुरुपपादत्वात्॥ अथैवं कपिसंयोगादिसामान्यस्य मूलावच्छेदेनाभावव
तिकपिसंयोगादिमद्वृक्षादौ अनवच्छिन्नतया यथावद्विशेषणाभाववत्त्वविरहेण साध्यो पाध्योर्न सा
मान्यव्याप्तिनिर्वाहः अत्र केचित्॥ अवच्छिन्नत्वे कावच्छेदकावच्छेदकानवच्छिन्नत्वं च न याभावव

यावद्विशेषाभाववत्त्वमित्युपाधिर्तेनात्रिमन्तगुणेयावद्विशेषाभाववत्त्वंव्भवच्छिन्नत्वाभावेनोक्तो
भयाभाववत्कपिसंयोगवतिवृक्षेकपिसंयोगीययावद्विशेषाभाववत्त्वंमूलाद्यकावच्छेदकावच्छि
न्नमितितदनवच्छिन्नत्वाभावादुभयाववदितिनतक्तोपाधिसाध्ययोःसामान्यव्याप्तिभंगः॥अ
यवृक्षादिनिष्ठानायावत्कपिसंयोगविशेषाभाववाधिकरणतानानैकावच्छेदकावच्छिन्नत्वंसं
भवति॥वृक्षाद्यवृत्तिकपिसंयोगादिव्यक्तीनायेभावास्तेषावृक्षादोव्याप्यवृत्तितयातन्निष्ठतद
धिकरणतानामनवच्छिन्नत्वात्॥नचव्याप्यवृत्त्यधिकरणतानामनवच्छिन्नतयान्यासांचैकाव
च्छेदकावच्छिन्नतयासर्वास्ववतासुउभयाभावोऽस्तइतिवाच्यं॥एवंसतिपक्षनिष्ठसंयोगव्य
क्तीनांदिग्देशविशेषाद्यवच्छिन्नानांयावंतोऽभावाःपक्षनिष्ठतावन्निरूपितानांसर्वासामेकाव
वी
धिकरणा

गदा० दी

छेदकविरहेपि विशिष्टानामवच्छेदकैक्यसंभवे सर्वास्वेव तासु ताद्दशतादृशावच्छेदकमादायैकावच्छे-
दकावच्छिन्नत्वं संभवतीत्युभयाभावसत्वान्न दवृत्तिसंयोगस्य क्तीनां येभावास्तेषां तच्छिन्नेशाधिक
रणतासु स्वानवच्छिन्नतयाउभयाभावसत्वादुक्तोपाधेर्यावत्संयोगाभावरूपसाधनव्यापकतापत्ते
ःस्वसमानाधिकरणयावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वस्यैकावच्छेदकावच्छिन्नत्व भयाभावघटकर
रूपत्वेन्च हस्तादिनिष्ठमूलाद्यवच्छिन्नकपिसंयोगाद्यभावाधिकरणतास्वपि न तथात्वसंभवस्तत्स
मानाधिकरणव्याप्यवृत्तिकपिसंयोगाभावाद्यधिकरणतानामपि ताद्दशयावदधिकरणतांतर्ग
तत्वात्तदवच्छेदकस्य चाप्रसिद्धत्वादिति चेन्न ॥ एकावच्छेदकावच्छिन्नत्वस्य स्वसमानाधिकरणकिं
चिदवच्छिन्नयावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वविपरूपस्याविवक्षितत्वेनानवच्छिन्नापि

करणतानिःसद्भावच्छिन्नाधिकरणतानामेकावच्छेदकावच्छिन्नत्वासंभवेऽपिक्षतिविरहात्॥अथवा
यावद्विशेषाभाववत्त्वमित्यनेनयावत्तदीयविशेषाभाववत्त्वावच्छिन्ननिरूपितमेकाधिकरणत्वंवि
वक्षितं॥नतुतत्समुदायः॥एकावच्छिन्नत्वंचएकमात्रवृत्तिधर्मावच्छिन्नावच्छेदकावच्छिन्नत्वंनत्व
न्निन्नावच्छेदककत्वं॥वृक्षावृत्तिसंयोगानांवृक्षनिष्ठाभावायद्यप्यव्याप्यवृत्तयस्तथापिव्याप्यवृ
त्तिसाधारणयावत्त्वेनतेषामव्याप्यवृत्तित्वात्तत्साधारणयावत्त्वावच्छिन्ननिरूपिताधिकरणताए
ग कमात्रवृत्तितत्तन्मूलत्वाद्यवच्छिन्नतन्मूलादिरूपावयवावच्छिन्नेतितन्नोभयाभावोऽक्षतएवेतिन
साध्योपाध्योःसामान्यव्याप्तिभंगः॥पक्षनिष्ठसंयोगसामान्यीययावद्विशेषाभावाधिकरणताच
नघटत्वेकावच्छेदकावच्छिन्नात्मसंमांदिक्त्विगगनेनसंयोगइत्यादिघटीतिविरहात्॥अपितुयत्किं

गदा०

चिदनुगतधर्मावच्छिन्नतावच्छेदकावच्छिन्नायावत्संयोगाभाववद्गगनमितिनिरस्तयात्॥एकरूपावच्छि
न्नस्यप्रतियोग्यभावाधिकरणतावच्छेदकत्वेविरोधात्॥एकस्यापिविशेषरूपसामान्यरूपाभ्या
मुभयावच्छेदकत्वोपगमात्॥तथाचपक्षनिष्ठसंयोगविशेषाभावानांयावत्त्वावच्छिन्ननिरूपिताधि
करणतानिरुक्तैकावच्छेदकावच्छिन्नत्ववतीतितस्यास्तत्कोभयवत्त्वादुपाधेःसाधनाव्यापकत्व
मितिवदंति॥वस्तुतस्तुज्ञानवच्छिन्नयावद्विशेषाभाववत्त्वमेवउपाधिः॥तादृशोपाधिनासाध्यस्य
सामान्यव्याप्तिविरहेपिसंयोगसामान्याभावरूपपर्यवसितसाध्यव्यापकतयातादृशोपाधेःसत्त्व
तिपक्षेऽव्यापकत्वमप्यादृतं॥तादात्म्येनसाध्यवतोप्युपाधितयातादृशोपाध्यभावेनसंयोगसामान्या व्याप्य
भावरूपसाध्यवद्भेदोऽन्यत्रापिसिद्धोपिसाध्यंपुनःशक्यतएवखभावसाधकस्यातिरेकिणिप्रतियोगि

पक्षा...त्तिउपा...व्याप्यत्वेनसाध्येपक्षाव्यत्तिसाधना। सत्प्रतिपक्षानिर्वाहप्रुतिके। चित्‌ २

मात्रप्रसिद्धेरपेक्षितत्वात्‌॥ तपाध्याभावेनसाध्याभावसाधनेतुनसम्यक्‌॥ संयोगरूपस्यतस्यसा
धनेसिद्धसाधनात्‌सत्प्रतिपक्षानिर्वाहात्‌॥ सिद्धसाधनादितःसाध्याभावसाधनासंभवेपिप्रति
योगिप्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतावच्छेदकतयागृह्यमाणोपाधितावच्छेदका
वच्छिन्नाभाववत्ताज्ञानात्‌पक्षेसाध्यानुमितिविरोधइतिसारं॥ अथवाप्रतियोग्यधिकरणत्वरूपप
क्षधर्मावच्छिन्नसामान्याभावरूपसाध्यव्यापकतयाएकावच्छेदेनेत्यादेर्यथाश्रुतस्यैवउपाधितानि
र्वाहः॥ तत्रप्रतियोगिमतियस्यसामान्याभावस्तत्रैकावच्छेदेनतस्ययावद्विशेषाभावादेर्यथाश्रुत
स्यैवउपाधितावत्वमितिनिर्वाहः॥ यत्रप्रतियोगिमतियस्यसामान्याभावस्तत्रैकावच्छेदकावच्छेदे
नसंस्ययावद्विशेषाभाववत्वमितिसामान्यव्याप्तेःकपिसंयोगादिमतःकपिसंयोगादिसामान्याभा
त

वाधिकरणवृक्षादेरेकावछेनकपिसंयोगविशेषाभावकूटवत्वनियमेनमुक्तत्वात्॥गुणादावेकावछे
देनयावद्विशेषाभाववासत्वेपितत्प्रतियोग्यसत्वेनावछिन्नसाध्यव्यापकत्वाक्षतेश्च॥द्रव्येचप्रतियो
गिमत्वविशिष्टयावत्संयोगविशेषाभावाधिकरणैकावछेदेनतदीययावद्विशेषाभावसत्वात्॥प्रति
योगिमत्वरूपावछेदकविशिष्टसाधनाव्यापकत्वेतस्यवृक्षादिवृत्तिकपिसंयोगादिविशेषाभावकू
टांतर्गतकतिपयाभावाधिकरणतानामनवछिन्नत्वेपितत्कूटस्यैकावछेदकावछिन्नत्वंपूर्ववदु
पपादनीयं॥अथैतादृशोपाधेर्व्यभिचारोन्नायकत्वंसत्प्रतिपक्षोत्थापकत्वंवानसंभवतिप्रकृतसा
ध्यव्यापकस्यैकावछेदकावछिन्नयावद्विशेषाभाववत्वस्याप्रसिद्धेः॥द्रव्येतदीययावद्विशेषाभावव
त्वस्यावछिन्नत्वेपिएकावछेदकावछिन्नत्वाभावात्॥गुणेचतस्यावछिन्नतायाएवाभावात्॥प्रतियो

गिमत्वविशिष्टकपिसंयोगीयसामान्याभावव्यापकत्वस्य तदीयएकावच्छेदकावच्छिन्नयावद्विशेषा
भाववत्त्वप्रसिद्धावपि तदभावेन प्रकृतसाध्यवद्भेदसाधनेन संभवति॥ तस्य प्रकृतसाध्याव्यापक
त्वात्॥ प्रतियोगिसमत्वविशिष्टकपिसंयोगीयसामान्याभाववद्भेदस्य कपिसंयोगादिरूपप्रतियो
गि॥दिरभ्रन्यहेतुमति साध्यमानेन कपिसंयोगसामान्याभाववद्भेदपर्यवसायी प्रतियोगिमद्भेदस्य तत्र-
त्राबाधात्॥ प्रतियोगिमतिव्यएकावच्छेदकावच्छिन्नतदीययावद्विशेषाभावस्य सत्वेन तद्वत्ताभाव-
रूपहेतावसिद्धिरिति न व्यभिचारो न यन विवादः इतिमेवं॥ कश्चिद्द्व्येजलादिसंगवति तत्सामान्याभा यो
वस्य सत्वे एकावच्छिन्नतदीययावद्विशेषाभावसत्वात् तदीयप्रतियोगिमत्वविशिष्टतत्सामान्याभा
वव्याभावव्यापकं एकावच्छेदकावच्छिन्नतदीययावद्विशेषाभाववत्त्वं पत्र इत्यस्य सर्वाविषयत्वावच्छेदेन-

विशिष्टाजत्वादिसंयोगस्यैक्यः यावद्विशेषणाभावरूपहेतुमति तत्तदेकावच्छेदका- च्छिन्नयावद्विशेषणा
भावविशेषणाभावरूपत्वसाध्याभावेन प्रतियोगिमत्त्वविशिष्टतत्सामान्याभावावच्छेदसिद्धौ बाधकाभावात्॥
प्रतियोगिमति तत्तद्विशेष्यावच्छेदपर्यवसानेन व्यभिचारसिद्धौ सामान्यव्याप्तिभंगात्॥ संयोगत्वे गग-
नादिनिष्ठाभावप्रतियोगितावच्छेदकत्वसाधकानुमानौपयिकदर्शितसामान्यापि एकावच्छेदकाव
च्छेद्यत्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकयावदभावाधिकरणताशून्यगगना
दिकं यत्तत्तदन्यत्वस्योपाधित्वं बोध्यं॥ एतेनेति॥ अनवच्छिन्नयावत्संयोगविशेषाभाववत्त्वस्योपाधि-
त्वेनेत्यर्थः॥ इति विशेषव्याप्त्युपष्टम्भमनुमानं परास्तं॥ दूषणान्तरमप्याह॥ व्यर्थेति॥ त्वन्मते संयोग-
सामान्याभावस्य केवलान्वयितया तदभावत्वस्यैव तद्व्याप्यतावच्छेदकत्वेन इतरांशस्य व्यर्थत्वादिस

र्थः॥नन्वभावादित्येवहेतुरस्त्वित्यतआह॥अप्रयोजकत्वादिति॥व्याप्तिग्राहकतर्कशून्यत्वादित्य
र्थः॥विशेषव्याप्तावुपाध्यंतरमपिसुलभमित्याह॥निर्गुणत्वादेरिति॥आदिनानिष्परिमाणत्वादेःपरि
ग्रहः॥यद्धर्माश्रयानवच्छेदकंतत्तद्धर्मावच्छिन्नाभावावच्छेदकमितिव्याप्त्युपष्ट[illegible]ष्टंभंहस्त्वादेः
संयोगसामान्याभावावच्छेदकत्वसाधकमनुमानमाशंक्यनिराकुरुते॥नचेति॥गुणाद्यनवच्छेदकेति॥
गुणत्वाश्रयानवच्छेदकेत्यर्थः॥तदभावेति॥गुणत्वाद्यवच्छिन्नाभावेत्यर्थः॥तथाचगुणत्वाद्यवच्छिन्न
स्यापिव्याप्यवृत्तिताप्रसंगइतिभावः॥घटादेरव्याप्यतावच्छेदेनघटत्वाद्य[illegible]भावप्रसंगाघट
त्वादेरव्याप्यवृत्तितयातदवच्छेदकाप्रसिद्ध्यातदनवच्छेदकत्वरूपापादकाप्रसिद्धेर्नसंभवतीतिना
निर्दिष्टंगुणत्वाद्याश्रयस्यसंयोगादेवच्छेदकप्रसिद्ध्यानगुणत्वाद्यवच्छिन्नाभावावच्छेदकाप्रसिद्धि

गदा०

गयस्य

रिति भावः॥ ननु यद्धर्मो ऽश्रयानवच्छेदकमित्यत्रैतन्मात्रस्य वृत्ति——धर्मो विवक्षितः॥ गुणत्वादेश्चाप्य
वृत्तिरूपादिवृत्तितया तदाश्रयानवच्छेदकत्वस्य न तदवच्छिन्नाभावावच्छेदकत्वापादकतेत्याशंक्याह
वृक्षत्वादाविति संयोगत्वाश्रयानवच्छेदकत्वरूपसंयोगत्वावच्छिन्नाभावसाधकहेतोरसिद्धिमाह॥ यथा
चेति॥ घटपूर्ववृत्तित्वस्येति॥ दंडनिष्ठघटकारणताघटकतदव्यवहितपूर्वकालसंबंधस्येत्यर्थः॥
प्रतिदंडं भिन्नत्वेपि दंडत्वं तत्सामान्यावच्छेदकमित्यन्वयः॥ प्रतिदंडं भिन्नत्वेपीत्यनेन च दंडत्वत
स्य सेकातिप्रसक्तमिति सूचितं॥ एवमग्रेपि॥ तत्सामान्येति॥ घटपूर्ववृत्तिता [illegible] वच्छिन्नेत्यर्थ
॥ प्रत्येकातिप्रसक्तत्वेपि स्वावच्छेदकतावच्छेदकानुगतरूपावच्छिन्नानतिप्रसक्ततया
तस्यावच्छेदकत्वं॥ अन्यथा घटकारणतावच्छेदकत्वमेव तस्य भज्येतेति भावः॥ ननु दंडत्वस्य घट

नियतपूर्ववर्तिपूर्ववर्त्तितावच्छेदकत्वेन घटनियतपूर्ववर्त्तितायाः स्वरूपसंबंधरूपमवच्छेदकत्वं॥
पि तु तदव्यवहितपूर्वकालनिष्ठाभावप्रतियोगितानवच्छेदकत्वरूपं पारिभाषिकमेव तच्चातिप्र
सक्तेपि निराबाधमेव स्वरूपसंबंधरूपावच्छेदकतायाश्चावच्छेद्यानतिप्रसक्तत्वनियतत्वादि
तिप्रत्येकातिप्रसक्तस्य सामान्यानतिप्रसक्तत्वेन सामान्यरूपावच्छिन्नावच्छेदकत्वे दृष्टान्ततामा
ह॥ वह्निसामानाधिकरण्यस्येति॥ प्रतिधूमं भिन्नत्वेपि धूमे भिन्नत्वेपि धूमत्वे तत्सामान्यावच्छेद
कमित्यन्वयः॥ तत्पदेनात्र वह्निसामानाधिकरण्यपरामर्शः॥ धूमत्वस्य तदनवच्छेदकत्वे तस्यैव
वह्निव्याप्यतावच्छेदकत्वेनोपपद्येत॥ न च व्याप्यतावच्छेदकत्वमपि स्वविशिष्टव्यापकसाध्यकत्व
रूपं पारिभाषिकमेव तच्चातिप्रसक्तसाधारणमिति न दृष्टान्तसंगतिरिति वाच्यं॥ साध्यसामानाधि

गदा०

करणतावछेदकरूपवत्वंव्याप्तिस्तत्रावछेदकत्वंस्वरूपसंबंधविशेषः॥अतएवयत्वव्यर्थविशेष-
णघटितनीलधूमत्वादिनाहेतुतातत्रव्याप्यत्वासिद्धिरितिप्राचीनमतानुसारेणैवतदभिधानात्
॥अन्यथापुनःस्वरूपसंबंधरूपकारणत्वप्रतियोगित्वादिनिरूपितमनुगतधर्मनिष्ठंस्वरूपसं-
बंधरूपमवछेदकत्वंदृष्टांततयाबोध्यं॥संयोगसामान्यस्यसंयोगत्वरूपानवछिन्नतावछेदक-
रूपावछिन्नस्यसुवचत्वाच्चेति॥प्रत्येकसंयोगादिव्यक्तेरतिप्रसक्तस्यापिद्रव्यत्वादेस्तद्रूपाव-
छिन्नानतिप्रसक्तत्वादितिभावः॥यद्यप्येवमपिप्रमेयत्वादेःसंयोगसामान्यातिप्रसक्तत्वेन
तत्सामान्यावछेदकत्वाप्रसक्त्यातत्क्रम्यातिबलात्तदवछेदेनसंयोगसामान्याभावसिद्धिर्नेश व
क्तेवारयितुं॥तथापिप्रतियोगिमत्संबंधदेशकालयोरेवप्रतियोग्यनवछेदकयोर्भूतलादे-

सकालवृत्तित्वविशिष्टतादृशावच्छेदकत्वानोदे:रभावावच्छेद ..त्वनियमस्तयोरेवतदनुभवात्तुप्र
तियोग्यनवच्छेदकमात्रस्यमानाभावादित्यत्रतात्पर्यं॥उक्तसंयोगसामान्याभावस्यकालभेदाद्यवच्छे
देनस्वयमनुपदंव्यवस्थापनीयतयासंप्रदायविदस्त्यनेनास्वरसोदर्शितः॥गुणस्यसामान्याभावोपिव
र्त्ततइत्यन्वयः॥ध्वंसप्रागभावयोरत्यन्ताभावविरोधितायानिराकृतत्वादितिभावः॥एतेनतदवच्छेदे
नसंयोगादिसामान्याभावोपिसुतरांवर्त्ततेव्यापकधर्मावच्छिन्नाभाववतिव्याप्यधर्मावच्छिन्नाभावस
त्वनियमादितिसूचितंनचोत्पत्तिकालावच्छेदेनघटादौगुणस्यप्रागभावएवनतुसामान्यात्यन्ताभा
वोपिमानाभावादितिवाच्यं॥तदातत्रजन्यैकत्वहेतुभूतस्यएकत्वत्वावच्छिन्नाभावस्यावश्यकतया
तस्यैवस्वसमनियतगुणत्वावच्छिन्नाभावरूपतयाविवादायोगात्॥संयोगादिसाधकानित्यद्र

स्वमात्रहेतुस्थलेव्याप्यवृत्तित्वानायाह॥प्रलयेति॥महाप्रलयस्यजन्यभावानधिकरणतया॥ तदानींसंयो
गाद्यसत्वादितिभावः॥तदानींचगगनादौनित्यैकत्वपरिमाणादिसत्वेनगुणसामान्याभावासत्वा-
त्संयोगस्यैवोक्तं॥अत्रचप्रमाणंमहाप्रलयेगगनेनसंयोगइत्यादिप्रामाणिकव्यवहारएव॥ता-
दृशव्यवहारस्यध्वंसावगाहित्वेतिप्रसंगाद्व्यवहारानादरेचातीन्द्रियगगनादौगोत्वाद्यभावस्याप्रा-
माणिकतापत्तेः॥प्रत्यक्षासंभवात्॥अनुमानस्याप्रयोजकत्वात्॥वह्निमान्धूमादित्यत्राव्याप्यवृत्ति-
त्वानायाह॥तथेति॥दहनस्य॥दहनत्वावच्छिन्नस्यतत्प्रती॰रिसंतद्व्यसामान्य वृत्तित्वादित्यत्रहेतुः ते
प्रत्यक्षप्रमाणमुक्त्वायुक्तिमप्याहवृत्तेरिति॥संयोगरूपसंबंधस्येत्यर्थः॥वृत्तिमतोव्याप्यवृत्ति-
त्वस्य॥संयुक्तस्यतत्संबंधेनव्याप्यवृत्तितायाः॥असंभावितत्वादिति॥अयमाशयः॥संबंधितायाः सं
स

वंधाधीनत्वाद्यदवच्छेदेनसंबंधोनास्तितदवच्छेदेनतत्संबंधावच्छिन्नात्ततदभावसत्वमावश्यकं।संयो
गादेःसंबंधस्यसमवायस्याव्याप्यवृत्तित्वेपिनसंयोगादेर्व्याप्यवृत्तिता।गुणादौसमवायसत्वेपिसंयोगा
द्यसत्ववत्संयोगाद्यनवच्छेदकावच्छिन्नेसंयोगादिमतितत्समवायसत्वेपितदभावोपपत्तेरिति।के
चित्तु।वृत्तेरव्याप्यवृत्तित्वेवृत्तिमतोऽव्याप्यवृत्तित्ववद्वृत्तेर्व्याप्यवृत्तित्वेवृत्तिमतोपिव्याप्यवृत्तित्वंयु
क्तितोऽस्मात्।।संयोगादिप्रतियोगिकत्वविशिष्टसमवायोपिनव्याप्यवृत्तिरित्याहुः।।वह्निमान्धूमा
दित्यादौकालविशेषावच्छेदेनहेतुमतिवर्त्तमानसाध्याभावमादायघटत्ववारणकालत्वादित्यादौप
दाद्यवच्छेदेनकालेवर्त्तमानकैलिकसंबंधावच्छिन्नाभावमादायचव्याप्यवृत्तिदानायाह[illegible]वमिति
।प्रतियोगिमतोदेशस्यप्रतियोग्यनधिकरणकालावच्छेदेनप्रतियोगिमतःकालस्यचप्रतियोग्यन

गदा०

धिकरणदेशावच्छेदेनाभाववत्त्वमित्यर्थः॥इदानीमत्रपदेनास्तीत्यादिप्रत्ययेदेशनिष्ठायाःकालावच्छिन्ना
धारतायाःकालनिष्ठायाःदेशविशेषावच्छिन्नाधिकरणतायावाविषयत्वमित्यत्रविनिगमनाविरहाद
दुभयस्यैवविषयत्वादितिभावः॥तत्तत्साध्यकेति॥गुणत्वाद्यवच्छिन्नसाध्यकद्रव्यत्वाद्यव्याप्तिवा
रणायेत्यर्थः॥तत्तत्स्वसमानाधिकरणेति॥स्वव्याप्यवृत्तिसाध्यकेप्रतियोगिवैयधिकरण्यमित्यत्र र्थघटितत्वाभेर
स्य घटितेवव्याप्तिर्व्याप्यवृत्तिसाध्यकेतुप्रतियोगिवैयधिकरण्यानुपस्थितिदशायामपिहेतुसमाना
धिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहादनुमितुस्तत्प्रतियोगिवैयधिकरण्या
घटितापिव्याप्तिरस्ति॥प्रतियोगिवैयधिकरण्यघटितव्याप्तिरुभयत्रैवप्रतिवानुमितिप्रयोजि
काचेत्याशयेनमूलकृतस्तदुपादानमित्याह॥नोपादेयमिति॥व्याप्यवृत्तिसाध्यकेसाधनैकमुप

ति

दानेप्रसिद्धेनत्वनुपादानस्यसार्वत्रिकत्वमुक्तेव्याप्यवृत्तेरपिसाध्यस्यव्याप्यवृत्तित्वग्रहदशायांप्र-
तियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादेवानुमित्युपगमात्॥व्याप्यवृत्तिसाध्यकेसर्वत्रतादृशवि-
शेषणोपादाननियमः॥तदघटितायाअपिव्याप्तेःसर्वत्रानुमित्यौपयिकत्वात्॥अव्याप्यवृत्तिसा-
ध्यकेतुसर्वत्रतदुपादाननियमएवतदघटितव्याप्तेरप्रसिद्धेरितिवार्थः॥व्याप्यवृत्तिसाध्यकत्वंचस्व-
समानाधिकरणाभावाप्रतियोगिसाध्यकत्वंसत्तावान्द्रव्यत्वात्कालिकसंबंधावच्छिन्नाकाशाभा-
वाभाववान्आत्मत्वादित्यादिकंचनतथा॥अतस्तत्रसाध्यवतिकालात्मादौकालिकेदैशिकविशे-
षणताभ्यांतदभावसत्वात्॥प्रतियोगिवैयधिकरण्याविशेषितहेतुसमानाधिकरणाभावाप्रति-
योगित्वस्यसाध्येसत्वेनव्याप्तेःप्रतियोगिवैयधिकरण्यघटितत्वनियमेपिनदोषः॥केचित्तुव्याप्य

वृत्तिसाध्यकत्वं यथाश्रुतमेव हेतुमत्त्वभावस्य दैशिकविशेषणतया वृत्तिर्विवक्षणीया। न चैवं तन्तोस्त
तौ मतिकालादौ कालिकविशेषणतादिना साध्याभाववत्त्वेपि नाव्याप्तिः॥ भावस्याप्यभावत्वेन दैशिक
विशेषणतया वृत्तिः प्रामाणिकी॥ अतोनाभावसाध्यकव्यभिचारिण्यतिव्याप्तिः॥ याहशप्रतियोगिता
निरूपकाभावत्वविशिष्टस्य दैशिकविशेषणतया हेतुमतिवृत्तित्वं सोस्तु ताहशप्रतियोगितानवच्छेदक
त्वविवक्षया कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् इत्यादावव्याप्तेर्निरास
॥ तत्राकाशाभावस्याकाशाभावत्वेनैव दैशिकविशेषणतयात्मनि वृत्तिर्न तु तत्साध्यतावच्छे
दकावच्छिन्नप्रतियोगिताकत्वेन आत्मनि ताहशाभावाभावो नास्तीत्यप्रतीतेः॥ अव्याप्यवृत्तिसा
ध्यकेपि संयोगाभाववान् नित्यगुणत्वादित्यादावनुमितौ पयिकविविधव्याप्तेः संभवेन सर्वथैव तु

२ क्तेतावताप्यव्याप्यवृत्तिसाध्यकेपिकचित्तदभावघटितव्याप्तेः संभवतीति सूचितमित्याहुः॥ यत्तु॥ व्याप्यवृ
त्तिसाध्यकेऽव्याप्यवृत्तित्वग्रहाविषयसाध्यकेसर्वथैवासमानाधिकरण्यं तस्मानुपादेयतातत्रला
घवेनप्रतियोग्यसामानाधिकरण्याघटितव्याप्तेरेवानुमानांगतास्वीकारादितिव्याख्याने॥ तदसत्॥ त
त्रापिशब्दादिनाप्रतियोग्यसामानाधिकरण्यघटितव्याप्तेरेवयदाग्रहस्तदानुमितेरुत्पादापत्तातादृश
व्याप्तेरनुमानांगत्वस्योपगंतव्यत्वात्॥ अन्यथायाहृशव्यतिरेकिसाध्येनकेवलान्वयित्वभ्रमःतादृ
शसाध्यकेलाघवेनसाध्याभाववदवृत्तित्वमात्रस्यैवव्याप्तित्वोपगमप्रसंगात्॥ केवलान्वयिनोयस्सा
ध्यस्यनव्यतिरेकित्वभ्रमविषयतातत्साध्यकेहेतुसामानाधिकरण्यविशेषणापरित्यागस्यापिप्रसंगा
च्चापत्तु॥ प्रतियोग्यसामानाधिकरण्येत्यत्रप्रतियोगिपदंस्वप्रतियोगिपरमवश्यंवाच्यं॥ अन्यथाप्र

गदा० तियोगित्वस्य सामान्यरूपेण केवलान्वयितया प्रतियोग्यसमानाधिकरणाभावस्यैव दुर्लभत्वापत्तेः॥
तथा च स्वपदस्य तत्तदभावपरतया तत्तदभावप्रतियोग्यसामानाधिकरण्यविशिष्टत्वेन न हेतुमद्वृत्ति
नां तत्तदभावव्यक्तीनां प्रतियोगितावच्छेदकत्वाभावकूटज्ञानमनुमितिकारणं वाच्यं॥ तादृशं च ज्ञा
नमसर्वज्ञस्य दुर्घटं॥ अतः प्रतियोगिपदस्य प्रकृते साध्यार्थकतया साध्याभावनिष्ठसाध्यसामाना-
धिकरण्याभावविशिष्टः सन् हेतुमद्वृत्तिरभाव एवानुगतरूपेण निवेश्यः॥ सद्धेतौ सर्वेषामेव हेतु
समानाधिकरणाभावानां सर्वत्र हेत्वधिकरणे साध्यसमानाधिकरणतया साध्यसामानाधिकर
ण्याभावविशिष्टस्य हेतुमद्वृत्तित्वं न च सिध्यतीति साध्याभावनिष्ठत्वं साध्यसामानाधिकरण्यविशे
षणं सद्धेतौ सर्वत्र साध्याभावभिन्नत्वाभावेन तत्त्वासिद्धिसंभवः॥ व्यभिचारिणि च व्यभिचारनिरू

पकाधिकरण एव साध्याभावे साध्यसामानाधिकरण्याभावविशिष्टतया हेतुमद्वृत्तित्वमिति साध्याभाव
स्यापि लक्षणघटकतया नातिव्याप्तिः॥ संयोगेन प्रमेयसामान्यसाध्यकसद्धेतौ साध्याभावातिरि
क्ताभावाप्रसिद्ध्या हेतुमति साध्याभाववन्निष्ठसाध्यासामानाधिकरण्याभावाप्रसिद्धिरिति साध्यता
वच्छेद[..]ावच्छिन्नाभाववन्निष्ठसाध्यसामानाधिकरण्यस्याभावो निवेशनीयः॥ एवं च व्याप्यवृत्तिसाध्य
के साध्यकैतावच्छेदकावच्छिन्नसाध्याभाववन्निष्ठसाध्यासामानाधिकरण्याप्रसिद्ध्या ईदृशी व्याप्ति
र्न प्रसिध्यतीति तत्साध्यके प्रतियोग्यसामानाधिकरण्याघटितैव व्याप्तिरित्युक्तेनोपादेयं चैवं सा
दिनेति। तदपि न। साध्यसामानाधिकरण्यविशेषणीभूतसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियो साध्याभावे
गिताकत्वनिवेशप्रयोजनाभावाद्व्याप्यवृत्तिसाध्यकेपि संबंधान्तरावच्छिन्नसाध्याभाव एव साध्य

१ परेतु ननु प्रतियोगिसामानाधिकरण्यगर्भव्याप्तेः अनुमितिप्रयोजकत्वे प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशायां तत्सामानाधिकरण्य
विषयकादेव हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतावच्छेदकाभावनादनुमितिरूपेयत इत्यनुपपन्नमत आह। नोपादेयमिति।। व्याप्यवृत्ति
साध्यके अनुमितिपूर्वमव्याप्यवृत्तित्वज्ञानाविषयसाध्यके सर्वथैव प्रतियोगिवैयधिकरण्यमनोपादेयं। अनुमितिप्रयोजकव्या

गदा०

सामानाधिकरण्यञ्चसिध्यातत्राप्युक्तव्याप्तिप्रसिद्धेः।व्याप्यवृत्तिसाध्यकस्थले द्विविधाव्याप्तिर्नि
रुक्ताव्याप्यवृत्तिसाध्यके इतिसाध्यभेदेनव्याप्तिभेदाभावेनसंभवतीत्यतआहसाध्यादिभेदेनेति
।।साध्यतावच्छेदकादेर्विशिष्टव्याप्तिघटकतयातद्भेदेतद्भेदस्यावश्यकत्वादितिभावः।।यद्यपि
ज्ञात्वादेर्गुणकर्मान्यत्वादिसामानाधिकरण्योपलक्षितस्यसत्त्वादेर्व्याप्तिरस्त्येवगुणादौतदुपल
क्षितसत्त्वाद्यनुमितेरप्रमात्वात्तथापिगुणादौगुणान्यत्वादिसामानाधिकरण्यविशिष्टसत्त्वादिप्र
तियोगिकवैशिष्ट्यावगाहिन्याअनुमितेर्भ्रमत्वात्तत्तादृशानुमित्यौपयिकव्याप्तिशरीरेप्रतियो
गितावच्छेदकस्वीकारेमल्लिङ्गपरामर्शादपिभ्रमःस्यादितितादृशानुमित्यौपयिकव्याप्तिर्गुणादिवृ
त्तिहेतौनस्वीकर्त्तुंशक्यतेऽतःसाध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमित्यौपयिकव्या

प्तिशरीरे न निवेशनीयं तत्र तद्घटितव्याप्तिज्ञानमेव हेतुः सर्वथैवेत्यनेन यत्साध्यके कदाचिदनुमितः पूर्वं साध्ये हेतुमदव्या
प्यवृत्तित्वज्ञानं तत्र तदनुमितिनिर्वाहाय प्रतियोग्यसामानाधिकरण्यमुपादेयमेवेत्याशयः तत्प्रयोजकत्वमुपेयं वक्ष्यमाणरी
त्या व्यापिरनुगमा न व्याप्तिर्वा इति सूचितं। साध्यभेदेनैकलक्षणं प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशाभेदेन एकसाध्यके
व्यानुमितिप्रयोजकव्याप्तिभेदोपगमो दिवोद्भ्राः इति ध्येयं कुः।।१

च्छिशरीरेवृत्तियोगितावच्छेदकविशिष्टवैयधिकरण्यपर्यंतनिवेशपतत्ताहृशव्याप्तिव्याप्तिंवारयति॥-
वृत्तियोग्यसामानाधिकरण्यंचेति॥नचतत्रापिव्याप्तिस्वीकारेक्षतिविरहः॥गुणोगुणान्यत्वविशिष्ट
सत्तावानित्यादौताहृशव्याप्तिसत्वेपिबाधेनैवहेतोर्दुष्टत्वोपपत्तेः॥द्रव्यपक्षकताहृशसाध्यकजा-
त्यादिहेतोश्चसमीचीनतायाएवोपगमेक्षतिविरहात्॥बाधानवतारदशायांचगुणादौजात्या-
दिलिंगकविशिष्टसत्तावैशिष्ट्यानुमितित्वमरूपाप्रमात्मकसल्लिंगकपरामर्शादपिस्वीक्रियते।
व अतएवगंधप्रागभावकालावच्छिन्नोघटोगंधवानित्यपिवात्वादित्यादौबाधानवतारदशायांप्रमा-
त्मकपरामर्शोविशिष्टानुयोगिकवैशिष्ट्यावगाहिनीप्रमानुमितिमणिकारेणोपगम्यतइतिवाच्यं
॥प्रमानुमितिजनकपरामर्शस्यप्रमत्वसंभवेतदुपादानमावश्यकमित्याशयात्॥गंधप्रागभा-

वावच्छिन्नो घटो गंधवान् पृथिवीत्वादित्यादौ परामर्शस्य कथंचिदपि भ्रमत्वासंभवेनागत्या तत्र भ्रमा
त्मकपरामर्शाद्भ्रमानुमितिस्वीकारादुद्गुणो विशिष्टसत्तावान् जातिमत्वादित्यादौ विशिष्टप्रतियोगिकवै दित्यादि
शिष्ट्यविषयकानुमितिस्थलमुपेक्ष्य गंधप्रागभाववान् घटो गंधवान् इत्यादि विशिष्टानुयोगिकवैशि
ष्ट्यविषयकानुमितिस्थलमसिद्धिव्यभिचारासंकीर्णबाधोदाहरणत्वेनाभिहितवतो मणिकृतो
ऽप्युक्तस्थले साध्यनिर्णयस्त्वात्तात्पर्यमुन्नीयते॥ अथ विशिष्टनिरूपितश्च समवायादिर्विशेष्याविरो
धिनो विशिष्टाभावस्य प्रतियोगितावच्छेदकसंबंधः शुद्धसमवायादेस्तथात्वं दंडाद्युपलक्षितपुरु
षादिमत्वविरोधितादंडापुरुषाद्यनावात्तद्विरोधितद्विशिष्टपुरुषाद्यभाववैलक्षण्यानिर्वाहा
दात्॥ न च तदुपलक्षितपुरुषाद्यभावस्य सधर्मो न प्रतियोगितावच्छेदकः॥ अपि तु प्रतियोगि

तच्छून्यंवायुत्वादिसाध्येगंधवत्त्वांकूटघटितलक्षणानिव्याप्तिदानंविरुध्यैतेपृथिवीसमवे

वासमानाधिकरणएवप्रतियोगितावच्छेदकस्यैवप्रतियोगिनिविशेषणत्वात्तादृशस्यैववोपलक्षणा
तादितितादृशाभावयोर्विशेषइतिवाच्यं॥उपलक्षणेनदंडादिनाप्यादृशप्रतियोगिनिष्ठप्रतियोगिता
यापुरुषत्वादेरतिप्रसक्ततयातन्मात्रेतदवच्छेदकतायाःपर्याप्त्यसंभवेनदंडादेरपितदवच्छेदकको
टावप्रवेशमंतर्भावात्॥अतएवपुरुषादिमात्रेणनदंडाद्युपलक्षितपुरुषाद्यभावस्यविरोधःतदवच्छि
न्नाभावमात्रस्यैवतद्विशिष्टाभावत्वसत्त्वेनपृथिवीसमवेतत्वविशिष्टाभावस्यवायव्यादौसत्वे
नवायुत्वादेस्तत्रसाध्यसद्धेतुत्वात्तथाचप्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्याविव
क्षायामपिनातिव्याप्तिः॥प्रतियोगितावच्छेदकत्वावच्छिन्नसंबंधेनगुणादेर्विशिष्टसत्तानधिक
रणत्वादितिचेन्न॥विशिष्टनिरूपितसंबंधस्यविशिष्टाभावप्रतियोगितावच्छेदकत्वेसर्वत्रनसंभ

वर्त्तीति प्रागुक्तत्वात्॥ अगत्या विशिष्टाभावप्रतियोगिताविशेषणांतर्भावेन पर्याप्ता॥ तदुपलक्षिताभा
वप्रतियोगितातु दंडादिरूपावच्छेदकोपलक्षितविशेष्यस्यैव पर्याप्तेस्तुपगम्यतया विशेषस्योपपाद-
नीयत्वात् विशिष्टस्यातिरिक्ततामते विशिष्टसत्ताभावः सद्रूपत एव प्रतियोग्यसमानाधिकरण
इत्युभयसाध्यकानुसरणं नातिप्रसंग इति॥ हेतुमतीति विशिष्टाभावादेः स्वप्रतियोग्यसामानाधि
करण्येपि विशिष्टप्रतियोगिसामानाधिकरण्यविरहेण तन्त्वमानुमितिजनकपरामर्शस्य प्रमात्वप्र
संग इत्यर्थः॥ व्याप्यवृत्तिसाध्यकेपि प्रतियोगिवैयधिकरण्यावगाहिपरामर्शस्यानुमितिहेतु
तयोक्तसाध्यस्यव्याप्यवृत्तित्वेपि सानातिप्रसंगावसक्तिः॥ ननु मूर्त्तत्वादिहेतोर्नतत्वादिहे-
तोर्नतत्वादिविशिष्टमूर्त्तत्वादिरूपतदुभयत्वावच्छिन्नस्यैव नव्याप्तिर्न तु तदुभयवृत्तिबुद्धिविशे-

षविषयत्वरूपतदुभयत्वावच्छिन्नस्य तथात्वविशिष्टातिरिक्ततामेतद्विशिष्टसत्त्वादिसाध्यकतामादिदे
ताविवक्षोभयसाधकमूर्त्तत्वादिदेतावपि यथाश्रुतप्रतियोग्यसामानाधिकरण्यनिवेशपक्षे
नातिव्याप्तिप्रसक्तिरित्यभिमानेन न चेत्यादिना निराकरोति॥ न चेति। सहजनतणवप्रतियोगिव्यधिकर
णपदस्य तत्त्वावच्छेदकविशिष्टपरतां विनैवतुभयत्वेनोभयस्य वदार विषयतावच्छेदकेन विशिष्ट
त्वात्॥ एकविशिष्टापरत्वात्॥ अनतिरिक्तं॥ अभिन्नं॥ अतिरिक्तमित्यनुक्त्वानानतिरिक्तमि
त्यभिधानं उभयपदार्थतावच्छेदकत्वावच्छेदेनातिरिक्तत्वलाभाय नञ्पदस्यानुयोगितावच्छेद
कावच्छेदेनाभावबोधकत्वमुत्पत्तेः॥ एतावता। एकविशिष्टापरत्वमुभयनिष्ठ्यासज्यवृत्तिस्व
धर्मोभयपदार्थतावच्छेदकमस्तु प्रकृते चोभयत्वमेकविशिष्टापरत्वमेवेति शंकाव्युदास

गदा०

॥ अत्र हेतुवैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वस्य वृत्त्यक्षसिद्धत्वादिति घटत्वयोः सामानाधि पटह
करण्यविरहेऽपि तत्रोभयव्यवहारविषयतावच्छेदकस्य वृत्त्यक्षसिद्धत्वादित्यर्थः ॥ अन्यथा तत्रोभ
यव्यवहारानुपपत्तेरिति भावः ॥ यद्यपि घटत्वपटत्वोभयमिति प्रतीतौ कालिकसंबंधघटितसामा
नाधिकरण्यरूपवैशिष्ट्यस्य विषयतासंभवः तथापि वाच्यत्वघटत्वोभयसमवेतमित्यादिप्रती
तिव्यवहारविरहेण उभयं समवेतमिति प्रतीतिव्यवहारयोः समवायिसमवेतत्वरूपवैशिष्ट्य
विषयताया अभ्युपगतव्यतया घटत्वपटत्वोभयं समवेतमित्यादौ तादृशवैशिष्ट्याप्रसिद्ध्या व्या
सज्यवृत्तिधर्मस्यैव विषय इति भावः ॥ न चैवं तदनुरोधेन व्यासज्यवृत्तिधर्मविशेषस्य उभय
व्यवहारविषयताया आवश्यकत्वे एकविशिष्टापरत्वस्य तद्व्यवहारविषयत्वमप्रामाणिकमि

ति भूतत्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादावेकविशिष्टापरत्वस्य साध्यतावच्छेदकत्वप्रसक्तिस्त
थासत्यनुमितेरुभयवान्मितेरुभयवानित्याकारकतानुपपत्तेरिति निष्कृष्टं।। ननु भूतत्वाधिकर-
णे मनसि भूतत्वमूर्त्तत्वोभयं नास्तीति बुद्धेरेकविशिष्टापराभावावलंबनेनैवोपपत्तिः मनसि प्रतियो
गिसत्वेनोभयवृत्तिधर्मावच्छिन्नाभावासत्वादिति। क्वचिदेकविशिष्टापरत्वस्यापि तूभयव्यवहार
विषयतावच्छेदकत्वमावश्यकमित्यप्याहुः।। नवेति।। देदत्तेवच्छिन्नाभावः प्रसेकाधिकरणवृत्ति
रुभयव्यवहारविषयतावच्छेदकावच्छिन्नाभावः।। तदवच्छिन्नाभावात् एकविशिष्टापरत्वावच्छि
न्नाभावात् नेत्यनतिरिक्त इति विपरिणतेन संबंधः।। प्रतियोगितावच्छेदकविशिष्टेनैव प्रतियो
गिनाऽभावस्याविरोधादेकस्याधिकरणेपि व्यासज्यवृत्तिधर्मावच्छिन्नाभावस्य सत्वे बाधका

गदा०

नावादितिभावः॥एतेनमूर्त्तत्वस्यव्यासज्यवृत्त्युभयत्वावच्छिन्नव्यभिचारितापिव्यवस्थापिता॥आव
श्यकश्चएकाधिकरणेव्यासज्यवृत्तिधर्मावच्छिन्नतदभावः॥अन्यथासमवायघटितसामानाधिकरण्ये
नघटत्वादिविशिष्टपटत्वाद्यप्रसिद्ध्याघटादौसमवायेनघटत्वपटत्वोभयंनास्तीतिप्रतीतेरनुपपत्तेः
स्वत्वसमवायिसमवेतत्वरूपवैशिष्ट्यावच्छिन्नाभावस्यैवविषयतायाःस्वीकरणीयत्वात्॥अन्यथा
एककालीनत्वादिरूपवैशिष्ट्यावच्छिन्नस्यघटत्वादेःसमवायेनघटादौसत्त्वेनतादृशप्रतीत्यनि-
र्वाहादित्यादौवैशिष्ट्यविरहेपिघटत्वपटत्वयोरुक्तोभयत्वस्योभयत्वेनाभावस्यावश्यप्रत्यक्ष
सिद्धत्वादिति॥ननुतथापिव्यासज्यवृत्तिनिरुक्तोभयत्वेनसाध्यत्वेनमूर्त्तत्वस्यव्यभिचारितासं
भवति।एकप्रतियोगिमत्यपिअभावस्यप्रतियोगिसमानाधिकरणतयामूर्त्तत्वाधिकरणेमनः-

सि उभयाभावस्य प्रतियोगिव्यधिकरणत्वाभावात्॥ हेतुमति प्रतियोगिव्यधिकरणस्यैव साध्याभाव-
स्यव्यभिचारत्वात्॥ व्यभिचारलक्षणेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तस्यानिवे-
शादिसार्थक्यं निरस्यति नचतत्रेत्यादिना॥ व्याप्तिरेव। व्याप्तिरिष्टैव॥ तथात्वेऽपीति॥ मूर्त्तत्वस्य मनसि
सत्वेऽपीत्यर्थः॥ उभयत्वेनेति॥ उभयत्वविशिष्टवत्तायामनस्यसत्वादित्यर्थः॥ तथा च तत्रोभयत्व
विशिष्टवैशिष्ट्यविषयकानुमितेर्भ्रमतया तत्प्रयोजकहेतोर्न सद्धेतुत्वस्वीकारसंभवः॥ अत ए-
व व्यभिचारलक्षणेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेश्यमिति भावः॥
एकाधिकरणे उभयत्वविशिष्टासत्वमानमाह॥ नात्रोभयमितीति॥ तत्रोभयमिति प्रतीत्यभा-
वेन हेतुतयोक्तः॥ उभयत्वेनैकस्य सत्वोपगमेऽपि उभयत्राधिकरणवृत्तितायाः तादृशप्रतीतिविष-

पि

गदा०

यत्तयाएकस्मिन्नधिकरणेवृत्तित्वाभावेनतादृशाप्रतीतेर्न्नेमत्वसावच्छेदकत्वात्तादृशाप्रमाविरहोपप
त्तेः॥ननुप्रतियोग्यसामानाधिकरण्यस्याभावविशेषणत्वेलक्षणेत्यन्तपदवैयर्थ्यं॥धूमाद्यधिकरण-
निष्ठवह्न्यादिभेदस्यप्रतियोगिसमानाधिकरणत्वेनैवसाध्यतावच्छेदकस्यतत्प्रतियोगितावच्छेद
कतायाअकिंचित्करत्वादितिआशंकायांसाम्प्रदायिकोपदर्शितमत्यन्तपदप्रयोजनमाह॥अत्यं-
तपदंचेति॥अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्येतिलाभायेत्यन्तिमेनान्व
यः॥स्वंयस्यप्रतियोगिनोऽत्यन्ताभावस्तादृशांशप्रतियोग्यसामानाधिकरण्यपर्यन्तस्याभाव
विशेषणत्वलाभायेत्यर्थः॥अत्यन्ताभावत्वनिरूपकप्रतियोगितायाइति॥प्रतियोगितानवच्छे
दकेत्यत्रयाप्रतियोगितानिवेशात्तत्रात्यन्ताभावत्वरूपानुयोगितानिरूपकत्वविशेषस्यलाभाये ए

त्यर्थः॥क्रमेणव्याहन्निमाह॥असमर्थेति॥सर्वस्यैवाभावस्येति॥हेतुसमानाधिकरणाभावत्वेनोपादे-
यस्यसर्वस्यगोत्वाद्यभावस्येत्यर्थः॥स्वसमानाधिकरणाभावान्तरभिन्नत्वात्॥स्वंयस्यसमानाधिकर
णं तादृशघटत्वाभावभेदवत्वादित्यर्थः॥स्वरूपानतिरिक्तत्वात्॥गोत्वाद्यभावरूपाधिकरणस्वरूप-
त्वात्तदभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणस्वरूपतेतिसिद्धांतादि-
तिभावः॥प्रतियोग्यसमानाधिकरणाभावस्यदुर्लभत्वापत्तेरिति॥गोत्वाद्यभावानामत्यंताभाव-
त्वनिरूपकगोत्वादिरूपप्रतियोग्यसमानाधिकरणत्वेपिस्वनिष्ठभेदत्वनिरूपकघटत्वाद्यभाव
रूपप्रतियोगिसमानाधिकरणत्वान्नेतिभावः॥निरुक्ताभावस्वरूपस्यैवाभावस्यतादृशत्वेसुलभमिति
वाच्यं॥तस्यापिस्वसमानाधिकरणभेदभिन्नत्वेनतद्घटितत्वापत्तेर्भवस्थात्॥निरुक्तभेदस्यलक्षणवस्यान

समाप्ति

ना८०

नयेनव्यधिकरणस्वरूपतांगीकारात्॥प्रतियोगिसमानाधिकरणत्वनियमादि........॥रूपप्रतियोर
गितावच्छेदकसंबंधेनप्रतियोगपसामानाधिकरणयानिवेशेसर्वत्रनतादृशानांप्रसिद्धिः॥किंतुविशे वा
षणताविशेषेणसाध्यतास्थलेतन्मते॥भावेसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्व
स्यानिवेशपनिवेशपत्वात्॥साध्यतावच्छेदकसंबंधस्यतत्रनिवेशोपितत्रैवलदप्रसिद्धिर्दुष्टत्वा॥स्य
संताभावत्वनिरूपकप्रतियोग्यसामानाधिकरणपनिवेशोपिसर्वेषामेवाभावानांविशिष्टस्ता
भावावोधिदिरूपात्यंताभावत्वनिरूपकप्रतियोगिसामानाधिकरणपनियमात्॥तदसमाना
धिकरणाभावाप्रसिद्धेः॥पादृशप्रतियोगितत्वादिनावक्ष्यमाणरीतेरनुसरणेप्रतियोगिस्यसंता
नावत्वनिरूपकत्वनिवेशावैयर्थ्यमत्रास्वरसवीजमेवहेतुसमानाधिकरणेतिहेतुसमानाधि

करणास्यभेदत्वनिरूपकाभावांतररूपप्रतियोगिसमानाधिकरणत्वेपिविवक्षितात्पेताभावत्वनि
रूपकप्रतियोग्यसामानाधिकरण्यवान्गोत्वाभावादिर्घटत्वाभावादिरूपसाध्यस्यतन्निष्ठस्वभेदा
त्मकस्यतस्यप्रतियोगित्वादित्यर्थः॥अभावसाध्यकेतिघटत्वाभावादिसाध्यकपटत्वादिसाधनेत्यर्थः
॥अत्पेताभावत्वनिरूपकप्रतियोगितानिवेशेपिसंबंधांतरावच्छिन्नसाध्यात्पेताभावप्रतियोगिता
वारणायसाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशाधौक्येएतद्विशेषणमनर्थकंसाध्यतावच्छेद
कसंबंधेनप्रतियोग्यसामानाधिकरण्यनिवेशरूपसंबंधांतरावच्छिन्नाभाववारणेपिसर्वेषेवाभावे भा
घुर्ज्जरीत्याअत्पेताभावत्वनिरूकप्रतियोगिसामानाधिकरण्यस्यापिसत्वेनप्रकृतप्रतियोगि
तावच्छसामानाधिकरण्यस्यैवनिवेशनीयतयासाध्यनिष्ठप्रतियोगिताश्रयासामानाधिकरण्य

स्यसद्धेत्वधिकरणवृत्तित्वविशिष्टाभावे ऽसत्वेनाव्याप्तिप्रसक्तेरित्यस्य सरसबीजं संप्रदायानुगतात्यंता
भावत्वनिरूपकप्रतियोगितानिवेशपक्षे ऽतिव्याप्तिमाशंकते ऽथेत्यादिना यदा गोत्वमिति कालि-
कसंबंधेन गोगोत्वयोर्हेतुसाध्यत्वं ज्ञानाय गोमानयं गोत्वादिति प्रतिज्ञाहेतू संनिधाय कालि-
कसंबंधावच्छिन्नवृत्तिर्निर्बाधकदाव्युत्पत्त्यय घटितोदाहरणाभिधाने एवमप्येपि प्रमेयत्वं यस्येति व्य-
भिचारनिरूपकहेत्वधिकरणस्येत्यादि। ध्वंसवत्वेनात्यंताभावानधिकरणत्वादिति प्राचाम-
नुमतं ध्वंसप्रागभावयोरत्यंताभावविरोधित्वमादृत्यैतदेवाग्रे निराकृत्य समाधत्ते। अथ
कालिकसंबंधेन ध्वंसादिमत्यपि काले ऽत्यंताभावदृष्ट्याव विरोधः। महाकालादौ समवायादिसंबं-
धेन रूपात्यंताभावस्य सर्वानुमतत्वात् न च कालिकसंबंधावच्छिन्नगवात्यंताभावस्यतत्संबंधावच्छि

न्नगोध्वंसात्यंताभावरूपतायाम्प्यत्यंताभावस्यत्रितयप्रतियोगिकत्वमंगीकुर्वाणैः प्राचीनैरुपगमात्
कालिकसंबंधरूपप्रतियोगितावच्छेदकसंबंधेनगोध्वंसवतितत्संबंधावच्छिन्नगवात्यंताभाववृत्तिर्न
तेषामनुमतेतिवाच्यम् एवमपिकालिकसंबंधेनप्रतियोगिमत्यपितेनसंबंधेनात्यंताभावस्यकालिक-
संबंधेनवृत्त्याविरोधात्तेनसंबंधेनवृत्त्याविरोधात्तेनसंबंधेनप्रलयेवर्त्तमानमत्यंताभावमादा-
यातिव्याप्तिवारणासंभवात्तदभावस्यसंबंधविशेषनिवेशेप्रयोजनाभावात्नप्रतियोग्यसामाना-
धिकरण्यघटितापिव्याप्तिरनुमित्यौपयिकातद्विशेषणानुपस्थितिदशायामप्यनुमितेराननुभवि-
कतायावश्यमाणत्वात् तत्रचाभावस्यसंबंधविशेषोऽवश्यमेवप्रवेश्यः अन्यथाहेतुमतिकालिका-
दिसंबंधेनवर्त्तमानेसाध्याभावमादायाव्याप्तेरितितादृशाभासावेवोक्तस्यलेशमात्रसंगपरोयेयं

प्रतियोग्यसामानाधिकरण्यघटित [illegible] सत्त्वे [illegible] गतान्

गदा० यइतिवाच्यंयत्रहेतुमतिसाध्याभावःकालिकसंबंधेनवर्त्ततेतत्रप्रतियोग्यसामानाधिकरण्यागर्भ-
व्याप्तिग्रहस्यतत्रभ्रमत्वोपगमेक्षतिविरहात्तादृशव्याप्याभावप्यभावस्यसंबंधविशेषाप्रवेशात्तमेवं
प्रतियोग्यसामानाधिकरण्यानुपास्थितिदशायांसत्तावान्द्रव्यत्वादित्यादावप्यव्याप्तस्यानुमितिरनु-
भवसिद्धातदनुरोधेनस्वाभावसाध्यकेदैशिकविशेषणताविशेषेणहेतुमद्वृत्तित्वगर्भायाश्चापिव्याप्तेरनु-
मितिप्रयोजकतावाच्या॥तथासतितादृशव्याप्तिप्रमामादायतत्रकस्थलेऽनुमितिप्रसंगपरतया
ऽदूषकस्यसामंजस्यात्॥ननुप्रतियोग्यसामानाधिकरण्यघटकव्याप्तौस्वाभावस्यसंबंधविशेषानिवे-
शात्स्वाभावीयसंबंधविशेषानिवेशात्स्वाभावीयसंबंधविशेषागर्भप्रतियोग्यसामानाधिकरण्य-
गर्भव्यभिचारस्यसहविरोधित्वेनैवप्रतियोग्यसामानाधिकरण्यघटकव्याप्तेरनुगमस्यतयोरेवानुमितौ

पयिकतायावक्तव्यतयाऽभावीयसंबंधविशेषघटितव्याप्तिग्रहस्यतादृशव्यभिचारग्रहाप्रतिबंध
कतयातादृशव्याप्तेर्नानुमित्युपयोगिता।निर्बाहइतिवाच्यं॥तादृशव्याप्तिसंग्रहायैवाभावीयसंबंधवि
शेषघटितप्रतियोग्यसामानाधिकरण्यघटितव्यभिचारग्रहविरोधित्वेनव्याप्तीनामनुगमनीयत्वात्॥
॥तथाचतावताप्यभावीयसंबंधविशेषाघटितप्रतियोग्यसामानाधिकरण्यघटितव्याप्तेःसंग्रहसं
भवात्॥एवंसत्यव्यावर्त्तकाभावीयसंबंधघटितप्रतियोग्यसामानाधिकरण्यघटितव्याप्तिज्ञाना
दप्यनुमितिःस्यादितिचेदिष्टमेवैतत्॥एवंमतिप्रतियोग्यसामानाधिकरण्यगर्भेऽभावीयसंबं
धविशेषघटितव्याप्तिभ्रमात्ताप्युक्तस्थलेऽनुमितिप्रसंगोदुर्वारइतिचेत्।काक्षतिरस्माकं।वस्तुतस्तु
॥दीधितिकृतास्वयंनिष्कर्षणीयहेतुमतिप्रतियोग्यनधिकरणत्वनिवेशकल्पेप्रतियोगिव्यधिकर

णत्वघटितव्याप्याभावव्यापकीयसंबंधविशेषनिवेशस्यनिष्प्रयोजनत्वेपिप्रतियोग्यनधिकरणवृत्तित्व-
विशिष्टस्यहेतुमद्वृत्तितागर्भयथाश्रुतव्याप्तौतदीयसंबंधविशेषस्यनिवेशनमावश्यकमन्यथासं-
योगिद्रव्यत्वादित्यादौप्रतियोग्यनधिकरणगुणादिवृत्तित्वविशिष्टस्यापिसंयोगाद्यभावस्यकालिकसं-
बंधेनहेत्वधिकरणकालवृत्तितयाऽव्याप्तिप्रसंगात्।।एकसंबंधेनैकाधिकरणवृत्तित्वविशि-
ष्टस्याप्यन्यसंबंधेनाधिकरणांतरवृत्तित्वात्प्रतियोगिसामानाधिकरण्याभावनिवेशाकस्मेपि-
गुणादौतद्विशिष्टस्यसंयोगाद्यभावस्यकालिकसंबंधेनहेत्वधिकरणमहाकालवृत्तित्वात्तत्कस्य
प्यव्याप्तेरावश्यकत्वात्।।नचप्रतियोगिसामानाधिकरण्यविशिष्टस्यतस्यकालवृत्तित्वेप्रतियोगि-
सामानाधिकरण्याभावविशिष्टस्यनतद्वृत्तित्वसंभवः।।भावाभावविशिष्टस्यैकाधिकरणवृत्ति-

त्वेप्रतियोगिसामानाधिकरण्याभाववविशिष्टसंयोगाद्यभावस्यदैशिकविशेषणतयापिद्रव्यवृत्ति-
त्वप्रसंगादितिवाच्यं॥विरोधिनोर्भावाभावयोःकालिकसंबंधेनैकाधिकरणवृत्तितावत्भावाना-
ववविशिष्टस्यापिकालिकसंबंधेनैकत्रवृत्तौविरोधाभावात्तयद्यपिद्रव्यभावस्यदैशिकविशेषण-
तासंबंधनिवेशेऽभावसाध्यकेव्यभिचारिणिभावस्यदैशिकविशेषणतानुपगमेऽतिव्याप्त्यासाध्य-
निरूपितप्रतियोगितावच्छेदकसंबंधनिवेशेसमवायसंबंधावच्छिन्नजात्यभावसाध्यकेजाति-
त्वादिहेतावव्याप्तिर्जात्यादिरूपहेतुमतितादृशसमवायसंबंधेनवृत्तेरप्रसिद्धेः॥तथापिसाध्यतावच्-
छेदकसंबंधातिरिक्तसंबंधेनयासाध्याभावस्यवृत्तिस्तदन्यहेतुमद्वृत्तेःप्रकृतप्रतियोगितानिरूपि-
तानुयोगितावच्छेदकसंबंधेनहेतुमतिवृत्तेर्वाऽभावविशेषणत्वापगमान्नदोषः॥उक्तस्थलेहे

गदा० तुमतिकालिकाख्यविशेषणवृत्तित्वविशिष्टनित्यस्यात्यंताभावप्रसिध्यातिव्याप्तिसंगतिः॥अत्यंताभावत्व
घटकनित्यत्वांशंपरित्यज्य ध्वंससाधारणसंसर्गाभावत्वनिवेशे महाप्रलयेगोत्वरूपसामान्यधर्मा
वच्छिन्नप्रतियोगिताकध्वंसोपगंतृमते ध्वंसमादायोक्तस्थलेतिव्याप्तिः॥तांवारयितुमित्याशंक्याह
॥संसर्गाभावेति॥दैशिकविशेषणतयापि ध्वंसस्यकालवृत्तित्वमित्याशयेनोक्तशंकासंगतिः॥अ
न्यथाऽभावस्यतादृशसंबंधेनवृत्तिनिवेशेऽत्यंताभावमिवध्वंसमप्यादायातिव्याप्तेर्दुर्वारत्वात्॥न
चप्रतियोग्यधिकरणमहाकालेगाध्वंसस्यदैशिकविशेषणतासत्त्वेपिप्रतियोग्यनधिकर
णि णप्रलयेतस्यतादृशसंबंधाऽभावाधिक इतिवाच्यम्॥एतदुपाधिविशिष्टस्यप्रतियोग्यधिकरण
त्वतदन्योपाधिविशिष्टस्यैवमहाकालस्यतदभावाधिकरणतयामहाकालस्यदैशिकविशेष

४ अथवादीतिरूनिर्वचनीयप्रतियोगितावैयधिकरण्यकल्पाभिप्रायेणेदं नक्लृप्तप्रयोजनाभावात् भावे यत्किंचिद्वि-
शेषणविशेषात् नन्वभावेप्रतियोगिविशेषणविशेषोकालिकसंबंधेनगवाद्यंताभावस्यापिप्रलयेऽवृत्तेः संसर्गाभावमात्रप-
रत्वेकिंविशेषइतिप्रतियोगितावच्छेदककालिकसंबंधेनतत्प्रतियोगिनोध्वंसस्यहेत्वधिकरणेऽबाधात् गवादे

णतासत्त्वेपिप्रतियोग्यनधिकरणप्रलयेतस्यताहृशसंबंधाऽप्रामाणिकइतिवाच्यं॥ पदुपाधिविशि-
ष्टस्यप्रतियोग्यधिकरणत्वतदन्योपाधिविशिष्टस्यैवमहाकालस्यतदभावाधिकरणतयामहाका-
लस्यदैशिकविशेषणतयाध्वंसवत्वेप्रलयात्मकोपाधेरपिताहृशसंबंधेनतदाधारतायाआवश्यक-
त्वात्॥ अन्यथाप्रलयेगौर्नास्तीतिव्यवहारानुपपत्तेः॥ पदास्पंदइति॥ अत्रचव्यभिचारनिरूपका-
धिकरणखंडप्रलयेजन्यद्रव्यानधिकरणेतस्मिन्द्व्यणुकासत्वात्॥ पुनर्द्व्यणुकोत्पत्त्यानुरोधेप-
परमाणूनांस्पंदस्वीकारस्यावश्यकत्वात्॥ तथाचेहत्वाधिकरणोत्पन्नद्व्यणुकसामान्यध्वंसप्रागभाव-
योरसत्वादतिव्याप्तिरितिभावः॥ द्व्यणुकनाशानुगुणक्रियायांउत्तरसंयोगनाशपाया[illegible]धिकरणे-
चरमपरमाणुसंयोगनाशरूपमहाप्रलयपूर्ववर्तीक्षणे द्व्यणुकसामान्यध्वंससत्वाद्व्याप्तिः

ताभावस्यप्रतियोगिवैयधिकरण्याभावात् ध्वंसस्यतत्प्रतियोगिनोऽसंताभावस्यप्रतियोगितावच्छे-
दकदैशिकविशेषणतासंबंधेनकालेऽसत्वात् प्रतियोगिवैयधिकरण्यमक्षतमेव ।४

गदी०

आप्तिर्नेविचारसहेऽस्मतोयदादृष्टमिति॥ज्ञानत्वमात्रेणसाध्यतायांप्रलयईश्वरज्ञानसत्वादर्थसहेतुरेव
स्यतोजन्यमितिनित्यसुखाभिव्यक्तिर्मुक्तिरितिमतेखंडप्रलयेपिमुक्तात्मनिजन्यसहेतुत्वेसंभवती
त्यतोदुःखेतिजन्यमात्रेप्रत्यदृष्टस्यहेतुतयामहाप्रलयाव्यवहितप्राक्क्षणेपितत्कृतनकान्तस्यादृष्टस्या
वश्यकत्वंइतितदाजन्यज्ञानत्वदुःखत्वावच्छिन्नध्वंससत्वान्नोपदर्शितस्यलयोरतिव्याप्तिःसंभवतीत्यत
स्यलांतरमाह॥यदात्मेति॥यदात्मसमवेतादृष्टंप्रलयजनकंसतत्पदेनविवक्षितः॥व्यक्तिवा
रस्यात्रखंडप्रलयेसुषुप्त्यादौचबोध्यः॥खंडप्रलयनिष्टद्व्यणुकादिध्वंसस्यद्व्यणुकत्वादिरूपसामा
न्यधर्मावच्छिन्नप्रतियोगिताकत्वासंभवंसुत्पादयति॥नहीति॥तयोः॥ध्वंसप्रागभावयोः॥सामान्या
भावत्वमतेपि॥सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमतेपि॥ध्वंसप्रागभावयोरत्यंताभावविरो॰

धित्वमेतेनतयोस्तथात्वमित्येतत्सूचयितुमतेपीति॥एकविशेषेति॥एकविशेषप्रागभाववतिन-
सामान्यावच्छिन्नध्वंसस्यविशेषांतरध्वंसवतिनसामान्यधर्मावच्छिन्नध्वंसस्यावस्थानसंभवइत्यर्थः॥अ
न्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकतयातत्कालीनध्वंसादिप्रतियोगिताश्रयानागतादिपदार्थ
साधारणस्यतादृशप्रतियोगितावच्छेदकत्वासंभवादितिभावः॥यद्यप्येवंमहाप्रलयवृत्तयोपि
गोध्वंसाःप्रत्येकमेकैकगोव्यक्तिमात्रवृत्तिप्रतियोगिताकाइतिनकस्यापिध्वंसस्यप्रतियोगिता
याःसमनियतंगोत्वंतथापिचरमध्वंसस्ययावद्गोप्रतियोगिकत्वापगमेतत्प्रतियोगितावच्छेदकत्वं-
गोत्वस्यसंभवतीत्यभिप्रायेणसंसर्गाभावत्वनिवेशःपूर्वोक्तस्थलमुपेक्ष्यद्व्यणुकादिसाध्यकस्पंदा
दिहेतुकस्थलेतिव्याख्यातृभिरभिहिता॥वस्तुतस्तुध्वंसप्रागभावयोर्व्यधिकरणप्रतियोगिकत्वविरहा

चरमगोध्वंसस्याप्रियावश्चेप्रतियोगिकत्वेनसंभवतीतिध्येयं॥विरोधिनःप्रतियोगिनोधिकरणेकाले
एवचेद्भावोवर्त्ततेतदासुतरांध्वंसप्रागभाववतिकालेप्रलयादौअसौवर्त्ततइतिसूचनायप्रति-
योगिमतश्चेतिदृष्टांतः॥विरोधाभावात्॥बाधकाभावात्॥तथाचहेत्वधिकरणप्रलयादौगोत्वा
द्यवच्छिन्नाभावसत्वाद्वोक्तस्थलेव्याप्तिरितिभावः॥नचप्रलयेगोत्वाद्यवच्छिन्नाभावोऽप्रा-
माणिकःप्रत्यक्षायोगादनुमानस्याप्रयोजकत्वादितिवाच्यं॥प्रलयेगौर्नास्तीतिशास्त्रस्यैव-
प्रमाणत्वात्॥नहितादृशवाक्यस्याप्रामाण्यंकश्चिदुपैति॥नचध्वंसादिरेवतत्रनञर्थो-
नात्यंताभावइतिवाच्यं॥अन्वयितावच्छेदकसमानाधिकरणप्रतियोगिताकाभावमात्रस्य
नञाप्रतिपादनेतिप्रसंगात्तदवच्छिन्नप्रतियोगिताकाभावबोधकतायाएवतस्यमुत्सन्न

तयात्यंताभावमात्रस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमते ध्वंसादेर्नप्रतिपादनासंभवात्॥
अन्यथाप्रतियोगिमतितद्ध्वंसप्रागभाववतिच कालेकालिकसंबंधावच्छिन्नप्रतियोगिता ,स्यात्यंत
भावस्यावृत्तेः॥ अत्यंताभावस्य तादृशात्यंताभावस्य कालमात्रावृत्तित्वेति॥ दैशिकविशेषणतये
त्यादि॥ ननु ध्वंसप्रागभाववति अत्यंताभाववृत्तौ तस्य तदविरोधितावत् प्रतियोगिमतितद्वृ
त्यातस्य प्रतियोग्यविरोधिताप्यापद्येताविशेषादित्यत आह द्वयोस्त्विति॥ एकस्य प्रतियोगिम
तः कालस्य देशेनैवावच्छिन्नं प्रतियोग्यनवच्छेदकदेशावच्छिन्नं॥ तथात्वं दैशिकसंबंधेनका
लिकसंबंधावच्छिन्नात्यंताभाववत्त्वं॥ तथा च प्रतियोग्यभावयोरेकावच्छेदेनएकत्रावर्त्तमान
त्वं विरोधित्वं तावत[illegible]क्षतमेवेति भावः॥ अपरस्य ध्वंसादिमतः स्वरूपावच्छिन्नध्वंसाद्यपि

करणतावच्छेदकरूपावच्छिन्नत्वं तथात्वमित्यनुषज्यते॥ तथा च एकावच्छेदेन एकत्र वर्त्तमानतया-
ध्वंसाद्यविरोधित्वं अत्यन्ताभावस्येति भावः॥ ननु कालवृत्तौ देशस्यावच्छेदकत्वे किं मानम् अत आ-
हस्यैव देशे कालस्यैवेति॥ यथा देशे दैशिकसंबंधावच्छिन्नाभावस्य वृत्तौ कालस्यावच्छेदकत्वमिदा-
नीमत्र गौर्नास्तीति प्रतीतिबलात् तथा काले कालिकसंबंधावच्छिन्नाभावस्य वृत्तावपि देशवि-
शेषावच्छेदकत्वस्यावश्यकत्वं तथाविधप्रतीतिबलादेव तादृशप्रतीतेः कालावच्छेदेन देश-
वृत्तिर्देशावच्छेदेन कालवृत्तिर्वा विषय इत्यत्र विनिगमकाभावात्॥ अवच्छेदकत्वाधिक-
रणत्वयोरुभयोरेव सत्तासम्बन्धत्वादिति भावः॥ प्रतियोगिमत्यपि काले गवत्यन्ताभावस्य वृत्तौ
तस्याः समानाधिकरणत्वेन वारणात् कथं तमादाय लक्षणातिव्याप्तिर्वार्यते॥ इत्यत आह॥

तच्छून्यैवेति प्रतियोगिशून्ये प्रत्ययादावित्यर्थः ॥ तदभावस्य ॥ गवात्यंताभावस्य ॥ प्रतियोग्यधिकरण
त्वात् ॥ प्रतियोगिसामानाधिकरण्याभाववत्वात् ॥ सामानाधिकरण्यस्याव्याप्यवृत्तितामत एव प्रतियो
गिसामानाधिकरण्याभावस्याभावविशेषणत्वात् ॥ अन्यथा संयोगी सत्वादित्यादावेवातिव्याप्ति
ः तस्याव्याप्यवृत्तितापत्तेश्च प्रतियोग्यनधिकरणवृत्तित्वस्यैव निवेशनीयतया प्रत्ययादिवृत्तिगवात्यं
ताभावस्यान्यत्र प्रतियोगिसमानाधिकरणत्वेपि लक्षणाघटकत्वाव्याघातादिति भावः ॥ संसर्गाभा
वत्वतद्धटितात्यंताभावत्वयोर्मिथो घटितत्वेनाऽनवस्थामाशंकते ॥ नचेति संसर्गाभाववि
शेषः ॥ सदातनसंसर्गाभावः ॥ संसर्गा...वः ॥ संसर्गारोपः ॥ तादात्म्यातिरिक्तसंबंधेन प्रतियोग्या
रोपः ॥ तद्वदन्यावृत्तित्वे तिस्वाश्रयवद्वितपूर्वक्षणावच्छेदेन तद्वतोऽन्यस्मिन्वर्त्तते यद्यत्तदन्यत्वेनैस

र्थे॥ तत्र जन्यत्वे षष्ठ्यर्थे सप्तमी नियमांतरस्याविशिष्टधीमात्रविशिष्टधीनियामकत्वरूपसंबंधत्व घटकनियमस्यैव च संसर्गाभावत्वशरीरे न क्षतिरिति तदन्यमात्रत्वरूपनियमस्यैव तत्र प्रवेशनीयत्वादिति भावः॥ स्वमते नियमानंतर्भावस्यानुपदं वक्ष्यमाणत्वादाहुरित्युक्तं नियमाघटितमिति॥ आरोपस्याभावबुद्धिहेतुतायां निर्युक्तिकत्वात्तादात्म्यातिरिक्तसंबंधावच्छिन्नप्रतियोगिताकाभावत्वस्यैव संसर्गाभावत्वादिति भावः॥ प्रयोजनविरह इति॥ साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतः तादृशप्रतियोगितानवच्छेदकत्वस्य निवेशनीयतयान्योन्याभावत्वादिनिरूपकप्रतियोगितामादाय दोषाप्रसक्तेरिति भावः॥ प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यनिवेशकस्य मनिवेश्याह

ऽव्याप्तिश्चेति॥तन्मतेसंबंधांतरावच्छिन्नसाध्याभावमादायदोषवारणायसाध्यतावच्छेदकसंब
धावच्छिन्नप्रतियोगितायाएवनिवेशनीयतयातादात्म्यसंबंधेनयत्रसाध्यतावच्छेदकसंबंधावच्छि साध्यतानत्र२
न्नसंसर्गाभावप्रतियोगिताप्रसिद्ध्याव्याप्तिरप्यापद्येतेत्यर्थः॥ननुविषयतायावृत्त्यनियामकत्वे
प्रतियोगिवैयधिकरण्येसंबंधित्वानिवेशपक्षेपूर्वस्मन्नीयातिव्याप्त्यसंगतिरतआह॥विशेषेति॥
दिगुपाधीनांदेशोवृत्त्यावच्छेदकत्वमेवनत्वधिकरणत्वमितिमतेमनसोवृत्तित्वेपिनदैशिकवि
शेषणतयाऽधिकरणत्वमितिद्रव्यत्वमात्रस्यहेतुत्वेमनोरूपहेत्वधिकरणएवसाध्याभाव
प्रतियोगिव्यधिकरणइतिनातिव्याप्तिसंभवइत्यतआहमनोन्येतिननुहेत्वधिकरणदिक्कालयोरी
श्वरानतिरिक्तत्वमतेमनोन्यद्रव्यंसद्धेतुरेकेत्यतोदूषणांतरमाह॥जातिमानिति॥साध्यश्चन्या
त्वं

नामपीति॥साध्यतावच्छेदकसंबंधेनेत्यादिः॥एवंच्चाधिकरणत्वस्थानेसंबंधित्वनिवेशो॥अन्यो
न्याभावेपीति।तथाचनतादात्म्यसंबंधेनसाध्यतायामव्याप्तिरितिभावः॥तद्विशिष्टस्यप्रतियो
ग्यसामानाधिकरण्यावच्छिन्नस्य॥तेनेति॥कपिसंयोगीएतद्वृक्षत्वादित्यादौकपिसंयोगरूपः
साध्याभावस्यगुणादौप्रतियोगिसामानाधिकरण्याभाववत्त्वेपिहेत्वधिकरणीभूतवृक्षाः
देर्नकपिसंयोगसामानाधिकरण्याभावविशिष्टकपिसंयोगाभाववत्त्वंयत्रसामानाधिक
रण्यविशिष्टवत्त्वंतत्रतदभावविशिष्टाधिकरणत्वावरण्याभावनिवेशनेनाव्याप्तिवारणः
स्यसुकरत्वेपिमूलोपात्तहेतुसामानाधिकरण्यांशनिवेशवैयर्थ्यंनियानतथाविवक्षितं॥
सार्वभौमेनादृतंप्रतियोग्यसामानाधिकरण्यावच्छेदकीभूताधिकरणावच्छिन्नहेतुसामानाधि

२ मस्यानुअतःसाध्याभावेनलक्षणघटकत्वेतिनाव्याप्तिरितिभावःहेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिक

करणस्यभावाभावविशेषणत्वमुपेक्ष्यउपाध्यायमतेप्रतियोग्यसमानाधिकरणत्वरूपविशे
षणवैशिष्ट्यावच्छेदेनहेतुसामानाधिकरण्यरूपविशेषणवैशिष्ट्यनिवेशनएवलाघवमित्यालो
च्यतदनुयायिनादीधितिकारेणप्रतियोग्यसामानाधिकरण्यावच्छिन्नहेतुसामानाधिकरण्यंनिवेशि
तं।एवंचाश्रुतमूललग्नोऽयमेवार्थः।।प्रतियोग्यसामानाधिकरण्यहेतुसामानाधिकरण्ययोरुद्देश्य
तावच्छेदकविधेयभावस्याविवक्षितत्वादुद्देश्यतावच्छेदकविधेययोरवच्छेद्यावच्छिद्यावच्छेदकत्वाव
लाभस्यचव्युत्पत्तिवैसैत्वात्प्रतियोग्यसामानाधिकरण्यस्यहेतुसामानाधिकरण्यावच्छेदकत्वप्र
तियोग्यसामानाधिकरण्यरूपहेतुतावच्छेदकावच्छिन्नसंयोगाभावादेःसत्वादिव्याप्यत्वप्रसंगः।।स
त्वादिसामानाधिकरण्यावच्छेदकरूपवत्वस्यसत्वादित्वाहित्वादितिसार्वभौमोक्तदूषणमेतन्मते

गदा० निरवकाशतांताहृशव्याप्यभावेनेनपारिभाषिकस्यैवावच्छेदकत्वस्यविवक्षितत्वात्॥ताहृशस्यचतथा
विधहेतुतावच्छेदकव्याहृत्तत्वात्॥अन्यथाविषयितादिसंबंधेनघटत्वावच्छिन्नस्यज्ञानत्वादिव्या
प्यतायादुर्वारत्वात्॥ताहृशसंबंधेनज्ञानत्वादिसामानाधिकरण्येज्ञानविषयतारूपेघटत्वादेरव
च्छेदकत्वात्॥नन्वव्याप्यवृत्तिसाध्यकाव्याप्तिवारण्यायप्रतियोगिसमानाधिकरणभिन्नत्वस्यप्रति
योग्यसमानाधिकरणत्वमेवनिवेश्यतां किमुक्तविवक्षयागुणादौप्रतियोगिसामानाधिकरण्या
भाववतोपिकपिसंयोगाभावादेःप्रतियोगिसमानाधिकरणभिन्नत्वविरहात्नेदस्याव्याप्यवृत्तिता
नुपगमादित्यताह॥तद्वृत्तीति॥प्रतियोगिमद्वृत्तीत्यर्थः॥नार्थः॥नप्रतियोग्यसमानाधिकर
णपदेनविवक्षितः॥अव्याप्यवृत्तीति॥कपिसंयोगीसत्वादित्यादावित्यर्थः॥अतिप्रसंगादि

कपि ति॥ संयोगरूपसाध्याभावस्येत्यादौ प्रतियोगिसमानाधिकरणतया तद्भिन्नत्वविरहेण लक्षणाघट
कत्वादिति भावः॥ अत्र च सामानाधिकरण्यस्य स्वाश्रयवृत्तितायाः प्राक् स्वयं दूषितत्वात् प्र
तियोगिसामानाधिकरण्याभावनिवेशपक्षेप्यतिव्याप्तिवारणमशक्यमित्येतादृशानुपपत्तिमेव य
द्दत्यादिकल्पांतरानुसरणबीजतयाप्याचष्टे॥ अत्र चेति॥ असामानाधिकरण्यनिवेशकल्पे चेत्य
र्थः॥ इत्यस्वरसादित्यनेनान्वयः॥ प्रतीते॥ संयोगाभावे गुणे न संयोगसामानाधिकरण्यमित्या
दिप्रतीतेः॥ अन्यथा गुणादिनिष्ठसामानाधिकरण्यावच्छेदकत्वाद्यभावविषयकतया कपि
संयोगी एतत्वादित्यादौ अपि कपिसंयोगादिरूपसाध्याभावस्य प्रतियोगिवैयधिकरण्यावच्छे
दकगुणादिवृत्तित्वावच्छिन्नतया लक्षणाघटकतैवेत्यव्याप्तिरत आह॥ तच्चेति प्रतियोगिवैय

गदा०

धिकरणं चेत्यर्थः ॥ हेत्वधिकरणे हेत्वधिकरणनिरूपितं ॥ एतत्कल्पे च दृश्यकहेतुसामानाधिकर
ण्यं न निवेश्यमिति भावः ॥ एवं च हेत्वधिकरणनिरूपितप्रतियोग्यनधिकरणवृत्तित्वमेवाभावे विशे
षणं देयं ॥ न तु तदवच्छेदकावच्छिन्नत्वं अनतिप्रयोजकत्वात् ॥ वृत्तौ प्रतियोग्यनधिकरणनिरूपित
त्वहेत्वधिकरणनिरूपितत्वयोर्निवेशापेक्षया तत्र हेत्वधिकरणनिरूपितत्वस्य हेत्वधिकर
णे च प्रतियोग्यनधिकरणत्वनिवेशे लाघवमित्याशयेनैव तथैव निष्कर्षयति ॥ प्रतियोग्य
नधिकरणीभूतेति ॥ प्रतियोगितावच्छेदकावच्छिन्नानधिकरणेत्यर्थः ॥ तेन न दर्शितातिव्याप्ति
ः ॥ यस्य कस्यचिदित्यादिस्यादिषष्ठ्यन्तानां अनधिकरणत्वमित्यनेनान्वयः ॥ प्रतियोगितावर
छेदकावच्छिन्नस्य यस्य कस्यचिदनधिकरणत्वं नाम स्वप्रतियोगितावच्छेदकावच्छिन्नाधिक

रणप्रतियोगिकाभेदमात्रं॥तत्सामान्यस्यानधिकरणत्वंस्वप्रतियोगितावच्छेदकत्वेनाननुगता
कृतप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदः॥प्रतियोगितावच्छेदकयत्किंचिदि
ति॥प्रतियोगितावच्छेदकंतत्तद्व्यक्तित्वेननिवेश्यतदवच्छिन्नाधिकरणत्वावच्छिन्नभेदोवाविवक्षित
इत्यर्थः॥नव्यमतेसंयोगसामान्याभावस्यकेवलान्वयितयातत्रसाध्येसत्त्वादिःसद्धेतुरेवेत्यतोद्र
व्यत्वाभाववानेवेति॥तत्प्रतियोगीति॥संयोगरूपसाध्याभावप्रतियोगीत्यर्थः॥तत्तत्संयोगत्वा
वच्छिन्नाभावाभावस्यतत्तत्संयोगादेःसंयोगसामान्यानतिरि[illegible]त्वादितिभाव॥द्रव्यत्वस्यरूपाभार
वस्यैकव्यक्तिकतयाव्यक्तिविशेषाभावरूपप्रतियोगिसामानाधिकरण्येनघटतेऽतस्तत्स्वस
<u>कथंचिद्द्रव्यत्व</u>विशिष्टस्याभावरूपप्रतियोगिसामानाधिकरण्यमाह॥नित्यत्वादीति॥रूपादि

नाजन्यत्वादिपरिग्रहः॥ ननु विशिष्टाभावो विशिष्टस्यैव द्रव्यत्वस्य प्रतियोगी न तु शुद्धस्य तस्येति कथं शुद्ध
द्रव्यत्वस्य प्रतियोगिवैयधिकरण्यानुपपत्तिरित्यत आह। स्वाभावेति। न च सर्वस्यैवाभावस्य पूर्वक्षणा
दिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोग्यधिकरणाभावाप्रसिद्ध्या
नातिव्याप्तिसंभव इति वाच्यं॥ प्रतियोगितावछेदकसंबंधेन प्रतियोगिवैयधिकरण्यनिवेशपक्षे सं
नवस्य साध्यतावछेदकसंबंधेन तद्वैयधिकरण्यनिवेशपक्षे च स्वरूपसंबंधावछिन्नसाध्यकस्थले सा
ध्यतावछेदकसंबंधेन सर्वेषामेवाभावानां प्रतियोगिसमानाधिकरणत्वादव्याप्तेः प्रसक्तत्वाय तत्संबंधे
न स्वप्रतियोगितावछेदकावछिन्नानधिकरणत्वं हेतुमतस्तत्संबंधावछिन्नतदभावीयप्रतियोगि
तायां साध्यतावछेदकसंबंधावछिन्नत्वसाध्यतावछेदकधर्मावछिन्नत्वोभयाभाव एव विवक्षणीयः

॥एवंचोक्तस्थलेस्वरूपसंबंधेनप्रतियोग्यनधिकरणत्वाप्रसिद्धावपिसंयोगादिसंबंधेनघटाभावा-
यप्रतियोयोग्यनधिकरणान्तरेतुमत्विशिष्टघटाद्यभावीयप्रतियोगितासुस्वरूपसंबंधावच्छिन्नत्वद्व-
यत्वाभावत्वाद्यवच्छिन्नत्वाभावाभावस्याक्षतत्वात्अतिव्याप्तिरित्यभिप्रायात्॥केचित्तु॥स्वप्रतियो-
गिसामान्यानधिकरणहेत्वधिकरणकत्वेनगगनाभावएवतादृशप्रतियोग्यधिकरणः॥नचस्व-
प्रतियोगिसामान्यांतर्गतनित्यत्वादिविशिष्टगगनाभावाभावरूपप्रतियोग्यधिकरणकत्वेनतथात्व-
स्यनत्वसंभवइतिवाच्यं॥नित्यएवनित्यत्वविशिष्टगगनाभावाभावोना॥तिप्रत्ययात्तत्वस्य
स्यचनित्यत्वेनित्यत्वविशिष्टगगनानावाभावत्वकल्पनेनैवोपपन्नेगगनाभावेतदकल्पनात्॥नि-
त्यत्वविशिष्टगगनाभावाभावस्यगगनानागवाप्रतियोगित्वादित्याहुस्तन्न॥तथापिपूर्वक्षणवृत्तित्व

गदा॰

विशिष्टगगनाभावाभावरूपप्रतियोग्यधिकरणहेत्वधिकरणवृत्तित्वेन गगनाभावस्यप्रतियोगिव्यधिक
रणत्वासंभवात्॥ पूर्वक्षणवृत्तित्वावच्छिन्नावपि पूर्वक्षणवृत्तित्वविशिष्टगगनाभावाभावो नास्तीति भ्रमस्यातत्पू
र्वक्षणवृत्तित्वविशिष्टगगनाभावाभावाभावत्वस्य पूर्वक्षणवृत्तित्वे कल्पयितुमशक्यत्वेन गगनाभावान
तिरिक्त [illegible] विशिष्टगगनाभाव एव तत्वस्य कल्पनीयतया पूर्वक्षणवृत्तित्वविशिष्टगगनाभावाभावे ग
गनाभावप्रतियोगित्वावश्यकत्वादिति स्वरूपसंबंधेन गगनादेर्वृत्तिमत्वे तु नैष दोष इति ध्येयं॥ आ
त्मनि संयोगसामान्याभावस्य सर्वमतसिद्धत्वविरहात्कपीति॥ जन्यद्रव्यवृत्तिहेतुके हेत्वधिकरणे गुण
सामान्याभावस्यापि तत्त्वत्रिकालावच्छेदेन स्वमते सत्वात्तत्र तादृशप्रतियोगिवैयधिकरण्येन घ
टते ज्ञत्वात्मत्वसाध्यकानुसरणं॥ गुणसामान्याभावत्वस्य कपिसंयोगस्वरूपाभावप्रतियोगिता

हेतु=

वच्छेदकत्वस्फुटीकर्त्तुं कपिसंयोगाभावानां गुणत्वोत्कीर्त्तनं ॥ तत्प्रतियोगितावच्छेदकेति ॥ तथा च तादृ-
शाभावास्यापि यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरण एव तत्प्रतियोगितावच्छे
दकत्वात् कपिसंयोगाभावत्वस्याव्याप्तिरिति भावः ॥ यादृशेति । यत्प्रतियोगितावच्छेदकावच्छिन्नाधिकर
णत्वावच्छिन्नभेदवत्त्वमित्यर्थः ॥ कपिसंयोगा एतत्वादित्यादौ यत्किंचित्कपिसंयोगाद्व्यक्त्यनधिकर
णत्वेपि हेतुमतः कपिसंयोगत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नाधिकरणसामान्यभेदवत्त्वासं-
भवात् स्वपदेन तादृशप्रतियोगितोपात्तुं न शक्यत इति नाव्याप्तिः ॥ द्रव्यत्वाभाववान् सत्त्वादित्यादौ हेतु
मतो द्रव्यादेर्विशिष्टद्रव्यत्वाद्यभावरूपप्रतियोग्यधिकरणत्वेपि द्रव्यत्वाभावत्वावच्छिन्नाया प्रतियोगि
तातदवच्छेदकावच्छिन्नानधिकरणत्वात् तस्य लक्षणघटकत्वे इति नातिव्याप्तिः ॥ कपिसंयोगाभाववान्

शात्मत्वादित्यादेरच कपिसंयोगाभावत्वावच्छिन्नायाः प्रतियोगितातदवच्छेदकावच्छिन्नाधिकरणमेव हे-
तुमत। किंतु गुणसामान्याभावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणमेव तदनवच्छेद
कमेव साध्यतावच्छेदकमिति नाव्याप्तिरिति भावः॥ नचैवं घटत्वाद्यवच्छिन्नप्रतियोगितावच्छेदकावच्छिन्ना
नधिकरणं धूमवत्तादृशाभावप्रतियोगितावच्छेदकं च वह्नित्वमित्याकारकस्याभावकूटावगाहिनः सम्
हालंबनज्ञानस्यैवानुमितिहेतुतया विशिष्टपरामर्शस्यानुमितिहेतुत्वमनुपपन्नं तदभावकूटघटि
ततया व्याप्तेर्दुर्ज्ञेयत्वापत्तिश्चेति वाच्यं॥ हेतुमन्निष्ठभेदप्रतियोगितायां स्वावच्छेदकावच्छिन्नवत्वसंबं
धेनावच्छेदिकायाः प्रतियोगितातदनवच्छेदकत्वस्य एकसामान्याभावरूपस्य निवेशे तात्पर्यात्॥ तादृश
भेदप्रतियोगितायां स्वावच्छिन्नवत्वसंबंधेनानवच्छेदकत्वस्य साध्यतावच्छेदकविशेषणतयैव सामं

नस्मिन्नपियथासन्निवेशेननैवैयर्थ्यं॥तथाविधसंबंधेनतादृशाभेदप्रतियोगित्वानवच्छेदकसाध्यतावच्छे
दकावच्छिन्नसाध्यसामानाधिकरण्यंव्याप्तिरितिपुनरन्योन्याभावघटितलक्षणनिष्कृष्टार्थोबोध्यः॥२
संबंधसामान्येनहेतुमत्त्वनिवेशेऽव्याप्तेर्वक्ष्यमाणत्वात्॥संबंधविशेषेणहेतुमत्त्वप्रतियोगितायांसंबं
धविशेषावच्छिन्नत्वानिवेशेनासंभवस्यवाच्यतयातत्रतच्चनिवेशयति॥स्वत्वंचेति॥साध्यसामाना
धिकरण्यस्यानुमितिकारणीभूतज्ञानविषयहेतुनिष्ठसाध्यसामानाधिकरण्यशरीरे॥साध्यस्यचेति
।स्वत्वापिसाध्यसामानाधिकरण्यइति॥प्रविष्टइतिचानुषज्यते॥तथाचतत्संबंधेनहेतुमतिवर्त्तते
योऽभावस्तदीयस्तत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकोयोयोधर्मस्तदवच्छिन्नस्यतेनसाध्यताव
च्छेदकसंबंधेनाधिकरणेतेनहेतुतावच्छेदकसंबंधेनवर्त्तमानत्वंतादृशसाध्यतावच्छेदकसंबंधेन

साध्यानुमितिप्रयोजकमित्यर्थः॥व्यापकताघटकसाध्यीयसंबंधेनसाध्याधिकरणेतादृशसाधनीयसं
संबंधेनसाधनस्यावर्त्तमानत्वस्यहृदशायामनुमितिवारणायसामानाधिकरण्यशरीरसंबंधविशेष
निवेशनं॥वस्तुतस्तु॥विरुद्धत्वेनज्ञायमानधर्मवज्ज्ञानस्यानुमिताविवप्रतिबंधकतयावक्ष्यमाणत
यासामानाधिकरण्यशरीरेसंबंधविशेषानिवेशोपिनक्षतिः॥सामानाधिकरण्यावगाहितायांप्रयो
जकत्वंचविशिष्टपरामर्शनिर्वाहायोपेयते।पर्वतीयधूमव्यापकोवन्हिरितिव्यापकतापरामर्शेहे
तुतायांदूषितत्वात्च।नचस्वव्यापकसाध्यवद्धेतुमानित्याकारकःसामानाधिकरण्यानवगाहिवि
शिष्टपरामर्शएवहेतुरस्त्वामितिवाच्यं॥बहुव्रीह्यर्थस्यसामानाधिकरण्यपर्यवसितत्वादित्यवधे
यम्॥प्रतियोगिवैयधिकरण्यशरीरेप्रतियोगितावच्छेदकसंबंधनिवेशनवत्साध्यतावच्छेदकसं

बंधेनसाध्यवद्वृत्त्यधिकरणनिष्ठसंबंधांतरावच्छिन्नसाध्याभावमादायदूषणस्यापिनिराकरणसंभ
वेप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशानमफलमित्याशयेनाह॥यद्वेत्यादि॥तादा
त्म्यसंबंधेनव्यापकतानिर्वाहायप्रतियोग्यनधिकरणत्वमित्यनुक्त्वाप्रतियोग्यसंबंधित्वमभिहितं॥
ननुप्रतियोगिवैयधिकरण्येसंबंधित्वनिवेशेपितादात्म्यसंबंधेनव्याप्तिर्ननिर्वहति।।तादृशसाध्यता॰
वच्छेदकसंबंधेनसाध्याधिकरणप्रसिध्यातद्घटितसाध्यसामानाधिकरण्यस्याप्रसिद्धेरित्यतआह॥
एवंस्थितेइति।प्रतियोगिवैयधिकरण्यप्रशरीरेसंबंधित्वनिवेशेसतीत्यर्थः॥संबंधित्वंनिवेशनीयमिति
॥तथाचसाध्यसामानाधिकरण्येसाध्यसंबंधिसंबंधित्वंस्वभाववस्यहेतुसामानाधिकरण्यमपिहेतुसं
बंधिसंबंधिसंबंधित्वस्यादिनाग्नात्स्वंधर्मिणोधूमवदादेर्वह्निमदादेश्चतदेवदर्शयति।तथाचेति॥

तादात्म्यसंबंधावच्छिन्नेति॥ पूर्वोक्ताभिप्रायेण॥ धूमवद्वह्निमतोर्व्याप्तिमुक्त्वा धर्मिणो धूमवदादेर्वह्न्या-
दिरूपधर्मव्याप्यत्वं वह्निमदादिरूपधर्मिणश्च धूमादिरूपधर्मव्यापकत्वं चाह॥ एवमिति॥ व्यतिरे-
के॥ तादात्म्यसंबंधेन व्याप्तिव्यवस्थापनादेव तत्र तथोक्तमेव पृथिवीत्वेन तस्येतरभेदसाधनाय समादिःस-
गच्छते इति व्यक्तमन्यथा जलादीनां संयोगादिना पृथिव्यादिवृत्तितया तेन संबंधेन व्याप्तेर्जलादिभेदसा-
धनानुपयोगितया च तदुक्त्यसंगतेरिति भावः॥ पृथिवीत्वाभावस्य स्वरूपसंबंधावच्छिन्नाभावेन-
पृथिवीत्वस्वरूपेण जलादिभेदः सिद्धमिति॥ न तु तस्य कालिकसंबंधावच्छिन्नप्रतियोगिताकावा-
देवाभावेतोयेनेत्यत्र पृथिवीत्वेन व्याप्यस्य जलादेरन्योन्याभाव एव सिध्यति नात्यंताभाव इत्यत्र किं
नियामकमित्याशंकायां व्यतिरेकिणि तत्संबंधघटितव्यापकत्वेन गृह्यमाणस्य तत्संबंधावच्छि

त्प्रतियोगिताकाभावादेवाहेतौयेनसंबंधेनयस्यव्याप्यतागृहीतातत्संबंधावछिन्नप्रतियोगि
ताकएवतदभावःसिध्यतीतिसमाधानस्यअन्वयिनिव्याप्यताघटकसंबंधेनव्याप्यवत्ताज्ञानात्व्या
पकताघटकसंबंधेनैवव्यापकंसिध्यतीतिनियमंदृष्टांतविधयादर्शयति॥यथाचेति।तादृशेन।तादृ
शेनैवपक्षविशिष्टज्ञानेपक्षाधर्मिकविशिष्टज्ञानेविशिष्टानुमितिःवैशिष्ट्यविषयकानुमितिः॥व्या
प्यताघटकसंबंधेनैवव्याप्य‘वत्ताज्ञानहेतुरितिनियमस्यव्यापकताघटकेनैवसंबंधेनव्यापक
स्यानुमितिनियमस्यचक्रमेणप्रयोजनमाहतेनेति॥अनवतीर्णबाधस्याभ्रांतस्येतिशेषः॥घ
न मावयवेनवन्हिधीरित्यन्वयः॥तेसमवायेनवन्हिव्याप्यधर्मत्वेपिव्याप्यताघटकेनसंयोगेनतद्वत्ता
भावादितिभावः॥नवासमवायेनेति॥पर्वतवृत्तिहेतुवतिसमवायेनवन्हिरव्यापकत्वादितिभावः॥

गदा०

नवासंप्रकृतोपयुक्तनियमद्वयमाह ॥ तथैवेति ॥ संबंधेनासंबंधेनैव ॥ एतन्नियमद्वयस्य प्रयोजनांतरानु
रोधेनावश्यकत्वमिति दर्शयति ॥ कथमन्यथेति ॥ एतादृशनियमानभ्युपगमे इति कथमुपपद्यत
इति भावः ॥ अन्वयः महानसे संयोगेन धूमो न निवर्त्तत इत्यन्वय ॥ महानसधर्मिकसिद्धिविषयसं-
योगसंबंधावच्छिन्ननिष्ठत्वप्रतियोगिनेत्यर्थः ॥ निवर्त्तेत च धूम इत्यनुषज्यते ॥ प्रकृतमाह ॥ तथा चेति
व्याप्यत्वग्रहात् ॥ स्वरूपसंबंधावच्छिन्नपृथिवीत्वाभावनिष्ठव्यापकतानिरूपितव्याप्यताग्रहात् ॥ व्या-
पकनिष्ठस्य स्वरूपसंबंधावच्छिन्नप्रतियोगिताकेनैव पृथिवीत्वाभावाभावेन तेषां जलादीनां ॥ नान्वे
तावता व्याप्यस्मताभावसिद्धिः [redacted] कं यं निराकृतेत्यत आह ॥ सत्त्वं चेति ॥ स एवान्योन्याभाव एवे-
ति योजना ॥ तादात्म्यसंबंधावच्छिन्नाभावस्यान्योन्याभाव एव नात्यंताभाव इत्यर्थः ॥ अतो नेतरा-

सेतावत्तोऽभावसिद्धिरिभावः॥ तादात्म्यसंबंधेन व्याप्तेर्ज्ञानाचासम्मतिमाह। इत्यमेववेति॥ तादात्म्यसंबंधे
नव्याप्तिस्वीकारेणैवइतिग्रंथःसंगच्छत इत्यन्वयः॥ ननु तादात्म्यसंबंधेन व्याप्त्यनभ्युपगमे का क्षतिः॥ पृ
थिव्यां जलादिभेदसिद्धे जलादिभेदाभावव्यापकीभूताभावप्रतियोगित्वेन पृथिवीत्वज्ञानादेव संभवा
त्॥ पृथिव्येकदेशे जलादिभेदप्रसिद्ध्या तादृशव्याप्तिग्रहसंभवस्य व्यतिरेकिणि वक्ष्यमाणत्वात्॥ ता
दात्म्यसंबंधेन धर्मिणोऽनुमितेरप्यनुभवसिद्धत्वे धर्मितादात्म्यनिष्ठव्यापकताज्ञानस्यैव तद्धेतुताया
ः स्वीकरणीयत्वात् असति प्रतिबंधके तत्तादात्म्यादिविधेयकानुमितौ तादात्म्यसंबंधेन तस्य विधे
यत्वोपगमे क्षतिविरहादित्यत आह॥ अतएवेति॥ तादात्म्येन व्याप्तिस्वीकारादेव। गोत्वत्वाश्रयदृशा
यां गौः सिध्यतीत्यन्वयः॥ अन्यथा तत्र गोत्वत्वरूपसाध्यतावच्छेदकानुपस्थित्या गोत्वसाध्यकानुमितौ

पर्यिकव्याप्येदृग्ग्रहतया गोत्वसाध्यकानुमितेः तादात्म्यस्यापि गोत्वरूपतया तन्निष्ठव्यापकतायाश्चापि
गोत्वत्वोपस्थितिमन्तरेणादुर्ग्रहतया तादात्म्यधर्मिकव्यापकताज्ञानाधीनतादात्म्यसंसर्गकगवानुमितेश्चा
संभवेन स्वयं गौरित्याकारकानुमितेरनुभवसिद्धाया अपलापप्रसंगादिति भावः॥ यद्यपि गोत्वांशे गोत्व
त्वधर्मितावच्छेदकीकृत्यव्यापकत्वावच्छेदकत्वावगाहीग्रह एव गोत्वेन गोसाध्यकानुमितावपि हेतु
र्वाच्यः॥ निर्धर्मितावच्छेदककव्यापकतावच्छेदकत्वग्रहस्य व्यभिचारज्ञानाप्रतिबध्यतयाऽनुमि
त्यजनकत्वादिति। तादात्म्येन गोत्वावच्छिन्नसाध्यकानुमितिरपि गोत्वत्वानुपस्थितिदशायां न
संभवति तथापि वक्ष्यमाणप्रतियोगिताधर्मिकत्वभयाभावघटितलक्षणाभिप्रायेणेदमभिहि
तं॥ तन्मते स्वरूपतः साध्यतावच्छेदकप्रकारिकायां अनुमितौ स्वरूपतः साध्यतावच्छेदकप्रकार

कास्यसाधनवन्निष्ठाभावप्रतियोगित्वत्वावच्छेदेनसाध्यतावच्छेदकरूपावच्छिन्नत्वसाध्यतावच्छेद
कसंबंधावच्छिन्नत्वोभयाभावावगाहिज्ञानस्यहेतुतयातत्रगोत्वत्वज्ञानानपेक्षणेनानुपपत्त्यभावा
त्।इदंत्वायुक्तं।तादात्म्येनव्यापकतासिद्धिवत्गोत्वत्वाद्यग्रहदशायांयत्रगोस्तत्रसास्नादिरितिव्या
प्तिग्रहाधीनगवादिहेतुकसास्नादिसिद्ध्यनुरोधात्तत्संबंधेनव्याप्यतासिद्धिरपिदुष्पृथ्व्या।केचित्
तु।तादात्म्यसंबंधेनव्यापकत्वाप्रकत्वानुपगमेपिगवान्यावृत्तित्वरूपव्याप्तिज्ञानात्गोत्वादिवि
धेयकानुमितिर्निष्प्रत्यूहैव।।तथासतिअयंगौरित्याकारकतापिअनुमितेर्निर्वहति।।स्वरूपतो
गोत्वावगाहिनोगवान्यावृत्तित्वज्ञानात्स्वरूपतएवगोत्वविषयिण्यास्तस्यास्संभवात्।।नचानव
च्छिन्नविधेयतायाअजकसत्वात्तादात्म्यसंबंधेनगोरेवविधेयत्वमुचितं।।अयंगौरित्यादिवाक्य

गदा०

जन्यबोधेतादात्म्यसंबंधावच्छिन्नगवादिविधेयतायाः क्लृप्तत्वादितिवाच्यं॥ अयं गौरित्याकारकेऽदंत्वावच्
छिन्नविशेष्यकगोत्वादिप्रकारतातस्या एव विधेयत्वोपगमेऽनुमितौ तत्कल्पनेऽतिरिक्तविधेयताकल्प
नाभावात्॥ अस्तु वा गवान्यावृत्तित्वरूपव्याप्तिज्ञानादेव तादात्म्येन गवानुमितिः किं तादात्म्येन व्यापकता
येत्याशंकानिराचिकीर्षयोक्तं गोत्वत्वाद्यप्रवेशदशायामिति गवेतरावृत्तित्वांशे तु भूतमात्रादावप्रवेश
दशायामित्याहुः॥ तत्र गवेतरावृत्तित्वमात्रस्य गोत्वत्वशब्दार्थताविरहेऽपि तदक्षरतायाः दुर्वारत्वात्॥
गोत्वपदे तद्वृत्तिधर्मपरमिति न सम्यक्॥ गोत्वत्वस्य विशिष्टगवावृत्तित्वरूपस्य स्वरूपतो भानासंभवे
न तज्ज्ञानदशायां तद्वृत्तिधर्मभानस्यावश्यकत्वात्॥ अपरे तु गोत्वत्वाद्यप्रवेशदशायामपि गोः सिद्धौ ता
त्पर्यं॥ यदा गोत्वत्वमनुमितौ न भासते तदापि तत्र गौर्भासत इत्यर्थः॥ स्वरूपतोऽपि गोत्वादिप्रकारि

कागवाद्यनुमितिर्भवतीतियावत्॥तादात्म्येनव्यापकतानुपगमेगोत्वस्यैवसास्नादिलिंगकानुमितौ
भानस्योपगंतव्यतयाविधेयतायाश्चावच्छिन्नत्वनियमेनस्वरूपतोगोत्वप्रकारिकानुमितेरनुभव-
पा ३ सिद्धायाअनुपपत्तिरित्युपष्टंभसंगतिरितिप्राहुः॥यत्तु॥अनवच्छेदकांशेतादात्म्यसंबंधेनस्वरूपतःसा
ध्यतावच्छेदकप्रकारकज्ञानादनवच्छेदकत्वांशेऽविधेयतासंबंधेनस्वरूपतस्तत्प्रकारकज्ञानाद्वास्वरू
पतःतत्प्रकारकानुमित्युपगमेनगोत्ववान्यद्दशायामपितादात्म्येनव्यापकताज्ञानादनुमितिर्निर्व-
हतीनोक्तानुपपत्तिरिति॥तदसत्॥अयंगौरित्यादिज्ञानानुव्यवसायेस्वरूपतोगोत्वादिविशेषितप्रका
रिताप्रकारेणज्ञानभानात्समवायातिरिक्तेननिरूपितत्वसंबंधेनगोत्वादेःस्वरूपतःप्रकारतायाश्चा
वश्यकत्वेपिसमवायातिरिक्तेनापरसंबंधेनस्वरूपतःप्रकारतायाअप्रामाणिकत्वात्॥अन्यथाव्या

गदा०

पकताज्ञानहेतुतामते स्वरूपतोऽनन्त्वादेर्विधेयतावच्छेदकत्वानुपपत्त्या केवलान्वयिग्रंथे तज्ज्ञानस्या
नुमितिहेतुताखंडनं धिक्षतिदीकृतां विकृतां विरुध्येत॥ उक्तक्रमेण गवतन्निर्वाहात्। गोत्वानवच्छिन्नत्वप्र
प्रकारकप्रतियोगिताज्ञानेऽवच्छेद्यतायां निरूपितत्वसंबंधेन स्वरूपतो गोत्वप्रकारकत्वं दीधितिप्र
कारस्यासम्मतमेव तथासत्यपि त्वन्निमग्नयविरोधादित्यवधेयं॥ एवं चाधिकरणत्वस्यानेसंबंधित्व
निवेशे च। गगनादेरपीति॥ तस्याधिकरणप्रसिद्धावपि संयोगेन तत्संबंधित्वस्याप्रसिद्धत्तित्वस्याऽ
भावे तत्र च साध्यवत्संबंधित्वस्याप्रसिध्यायथोक्तव्याप्तिसत्वादिति भावः॥ वृत्तिनियामकसंयोग
त्वादृत्तरूपेण संयोगस्याभावप्रतियोगितावच्छेदकसंबंधत्वेन साध्यतावच्छेदकसंबंधस्य गग
नीयसंयोगस्याभावप्रतियोगितानवच्छेदकतया प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छे

स्यगगनीयसंयोगस्याभाववत्प्रतियोगितानवच्छेदकतयाप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छि
न्नत्वनिवेशाकल्प्येतथाविधप्रतियोगित्वाप्रसिद्ध्यासंयोगेनगगनस्यनव्यापकतानिर्वहतीत्यतउक्तंवृ-
त्तिनियामकसंयोगमात्रस्येति॥तादृशसंयोगसाधारणसंयोगत्वावच्छिन्नस्येत्यर्थः॥यद्वेत्याद्युक्तकल्पे
वृत्तिनियामकसाधारणरूपेणतादृशसंबंधत्वविरहेपिनक्षतिः॥तन्मतेप्रतियोगितायांसाध्यतावच्छे
दकसंबंधावच्छिन्नत्वानिवेशादित्याशयेनाह॥साध्यतावच्छेदकसंबंधेनेति॥पृथिवीत्वादिव्यापक
त्वमपीत्यत्रसंयोगेनगगनादेरित्यनुषज्यते॥ननुप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वा-
निवेशेपृथिव्यादिनिष्ठसमवायादिसंबंधावच्छिन्नाभाववत्प्रतियोगितयागगनादेर्नपृथिवीत्वादिव्याप-
कतासंभवइत्यतआह॥तदभाववतोपीति॥समवायादिनागगनाद्यभाववतोपीत्यर्थः॥तत्संबंधि-

प॰ यद्रूपावच्छिन्नयत्संबंधस्य व्यापकताघटकत्वं तद्रूपावच्छिन्नतत्संबंधेनैव अनुमितिनियमाभिप्रायेण दोषांतरमाह॥

गदा॰ त्वात्॥ गगनादिसंबंधित्वात्॥ तथा च तादृशगगनाद्यभावेन साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधिहेतुमत्त्विष्टत्वभावात् तस्मादायलक्षणसत्वनिष्पन्नत्वमेवेति भावः॥ ननु संयोगेन गगनव्यापकत्वेबाधानवतारदशायांत्वभ्रांतस्य वृत्तिनियामकसंयोगेनैव कथं न गगनानुमितिरित्यत आह॥ मितिरिपीति॥ तथैव वृत्तिनियामकसंयोगेनैव॥ तेनासंबंधित्वादिति॥ तथा च तत्संबंधावगाहने नुमितेर्भ्रमतया तत्र भ्रमात्मकपरामर्शस्यापेक्षितत्वादिति भावः॥ व्यापकत्वाच्चेति॥ वृत्तिनियामकेन संबंधेनैव गगनागघभावस्य प्रतियोगिसमानाधिकरणतया वृत्तिनियामकसंयोगेन प्रतियोगिव्यधिकरणाभावप्रतियोगितायां गगने सत्वेन तत्संबंधस्य व्यापकत्वाघटकत्वादित्यर्थः॥ तथा च व्यापकत्वाघटकसंबंधस्यानुमितावभावात् न तेनानुमितिप्रसंग इति भावः॥ ननु वृत्तिनियामकसं

योगेनगगनादिसंबंधिनोऽप्रसिद्ध्याकथंतेनसंबंधेनगगनाद्यभावस्यप्रतियोगिवैयधिकरण्यमित्यत
आह॥व्यक्तीभविष्यतीति॥वक्ष्यमाणोभयाभावघटितप्रतियोगिवैयधिकरण्यंतत्रापिसुलभमितिभा
वः॥कालिकविशेषणतयाघटादिसाध्यकेमहाकालत्वादिहेतौव्याप्त्यसिद्धिनिबंधनमव्याप्तिंशंक
ते॥नन्वित्यादिना॥खंडकालवृत्त्येतत्कालत्वादिहेतुकस्थलेऽतीतानागतव्यक्तीनांतत्राव्याप्तेर
त्वावच्छिन्नतादृशसंबंधावच्छिन्नाभावस्यैवहेतुमतिप्रतियोगिव्यधिकरणस्याप्रसिद्धइतिनाव्याप्तिर
तोऽष्टद्रव्यातिरिक्तद्रव्यात्मकेति॥जन्यमात्रस्यकालोपाधितामतेद्रव्यात्मकस्यापिखंडकालस्या
संभवान्नमहाकालपर्यंतत्वलाभइत्यतोऽतिरिक्तांतं॥यद्यपिगगनदिगात्ममनसांनित्यतयाखंड
कालत्वासंभवेनचतुर्द्रव्यातिरिक्तेत्युक्तावपिमहाकालत्वलाभस्तथापियत्किंचिच्चतुर्द्रव्याति

= नपृथिव्यादेः आकाशादेर्वारणायकालपदं =

गदा०

रिक्तत्वस्यपृथिव्यादावपिसत्वात्पृथिव्यादिचतुष्टयातिरिक्तत्वस्यविशेष्याभिधानएवतत्त्वाभःतो
त्विकेमहाकालस्यैवाष्टद्रव्यातिरिक्तद्रव्यपदेनाभिधानात्तत्तयाभिधानेविशेष्यानभिधानेपिना
स्यपरत्वशंकेतितथैवाभिहितंखंडकालसाधारणमहाकालवृत्तिहेतुत्वे[illegible]डकालरूपहेत्वधिक
रणारावलक्षणघटकोक्ताभावाप्रसिद्धिरितिकालमात्रवृत्तीत्यत्रमात्रपदं॥समवायादिनाकस्य
चित्साध्यत्वेसमवायादिनाघटाद्यभावएवमहाकालेतेनसंबंधेनप्रतियोगिव्यधिकरणःप्र
सिध्यतीत्यतोविशेषणताविशेषेणेति॥कालिकविशेषणतयेत्यर्थः॥व्याप्यवृत्तिसाध्यकेप्र
तियोगिवैयधिकरण्यानुपादानेनकेवलान्वयिनिर्वाच्यत्वादिव्यापकतासंभवइत्यतोऽव्याप्य
वृत्तीति॥कालिकसंबंधेनाव्याप्यवृत्तित्वंचव्यतिरेकिमात्रस्यैवकेवलान्वयिनोप्यनित्यस्य

विश्वविषयकजन्यज्ञानविषयत्वादेर्बोध्यं॥एतत्सर्वंवस्त्वव्याप्यभिप्रायेणाभिहितं॥अन्यवृ-
त्तिहेतुकेऽन्यसंबंधेनसाध्यतायां-- हेतुमतिसर्वत्रसाध्यतावच्छेदकसंबंधेनवृत्तिमन्मात्रस्यैवते
नसंबंधेनवृत्तित्वभ्रमदशायांअनुमितिजनकज्ञानानुपपत्तिरपिद्रष्टव्या॥एवंकालिकसंबंधेन-
व्याप्यवृत्तिसाध्यकेपिसाध्यस्यतेनसंबंधेनाव्याप्यवृत्तित्वभ्रमदशायांप्रतियोगिवैयधिकरण्याघटि
तायाःप्रतियोगिवैयधिकरण्यघटितायाश्चदुर्ग्रहत्वान्महाकालत्वादिहेतुकानुमित्यनुपपत्तिरपिस्वा
वच्छेदकसंबंधेनस्वावच्छेदकविशिष्टानधिकरणवृत्त्यधिकरणवृत्त्यभावीयसाध्यतावच्छेदकसंबंधाव
च्छिन्नप्रतियोगितानिवेशाकल्प्यतादृशप्रतियोगित्वाप्रसिद्ध्यभिधानेनन्यूनव्याप्तिंस्फुटीकरोति॥स्वावच्छे
दकेति॥स्वंप्रतियोगिता।कालो।महाकालः।तत्संबंधावच्छिन्नतस्य।कालिकसंबंधावच्छिन्नत्वस्यअ

गदा०

संभवादिति योजना ॥ कालिकसंबंधेन वृत्तिमन्मात्रस्यैव महाकालवृत्तेरवृत्तेरवृत्तेश्चतेन संबंधेन संबं-
धिनोऽप्रसिद्ध्या कस्यापि कालिकसंबंधावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यसंबं-
धिहेतुमद्वृत्तित्वासंभवेन समवायादिसंबंधावच्छिन्नघटाद्यभावघटितत्वात्प्रतियोगितायाश्च समवाया-
दिसंबंधेनैवावच्छिन्नत्वादिति भावः ॥ साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधिहेतुमद्वृत्त्यभावी-
यसंबंधावच्छिन्नत्वाविशेषितप्रतियोगितानिवेशकल्पे तादृशसंबंधेन प्रतियोग्यसंबंधिहेतुमत्तर-
एवाप्रसिद्ध्याव्याप्तिरित्याह । तेनेति । तेन संबंधेन गगनाद्यभावप्रतियोगिनस्तेन संबंधेन संबंधिरूप-
प्रतियोग्यप्रसिद्ध्या तेन संबंधेन प्रतियोग्यसंबंधित्वासिद्धिः स्फुटाकर्तुं प्रतियोग्यसंबंधित्वस्येत्यन-
भिधाय यत्प्रतियोगिसंबंधितदन्यत्वस्येत्यसमासेनाभिधानम् ॥ अथ कालिकसंबंधेन महाकाला

स्यवृत्तित्वविशिष्टस्यतत्संबंधावच्छिन्नाभावएवमहाकालेप्रतियोगितावच्छेदकविशिष्टप्रतियोगि
न्यधिकरणःप्रसिद्धःस्तमादायैवलक्षणसमन्वयात्कथमव्याप्त्यभिधानं॥नहिकालान्यवृत्तित्वविशि महा
ष्टघटादिनिरूपितःकालिकसंबंधोमहा-कालेसंभवतितद्धर्मिवृत्तित्वविशिष्टनिरूपितसंबंधानुप्र
योगितायास्तद्धर्मिनियतत्वात्॥अन्यथासत्वादिमतिगुणादौद्रव्यादिवृत्तित्वविशिष्टसत्ताद्यभाव
प्रत्ययानुपपत्तेः॥नचैवंह्रदादिवृत्तित्वविशिष्टवह्न्यभावादेर्विषयितासंबंधित्वंज्ञानेनस्यात्॥ या
ज्ञानस्यह्रदादिवृत्तित्वानिरूपकत्वात्इतिह्रदोवह्निमानित्यादौतादृशविशिष्टस्यबाधादिरू
पस्यहेत्वाभासत्वंनस्यात्॥ज्ञाननिष्ठविषयितयायादृशविशिष्टवत्त्वमनुमितिप्रतिबंधकतावच्छे द
दकंतादृशविशिष्टस्यैवतथात्वात्॥यदिचतत्संबंधेनतद्धर्मिसंबंधित्वविशिष्टनिरूपितस्तादृशसं

२ न चैतदनुरोधेनैव विशेष्यवृत्तिघटकसंबंधेन विशेषणविशेष्योभयाधिकरणेऽपि विशिष्टाधिकरणत्वं स्वीक्रियते प्रकृते च
घटविषयत्वतादृशघटपटयोर्द्वयोरपि विषयितासंबंधेन ज्ञाने सत्त्वात्। तादृशविशिष्टाधिकरणत्वं ज्ञानेऽक्षतमेवे
ति नेच्छाविषयत्वविशिष्टघटादौ हेत्वाभासत्वानुपपत्तिः। इत्थं च कालिकसंबंधेन महाकालान्यवृत्तिमहाकाले सत्त्वा

गदा०

बंधो विशेषणताकोटिप्रविष्टस्य धर्मिनियत इति संबंधांतरेण दादिवृत्तित्वविशिष्टनिरूपितविषयिता
संबंधो ज्ञाने संभववत्येवेति विभाव्यते तदापि इच्छादिविषयत्वविशिष्टघटादिनिरूपितविषयितासं
बंधस्य ज्ञाने संभवादिच्छाविषयत्वाभावादिसाध्यकघटादि [redacted] पक्षकस्य जेतादृशविशिष्टस्य बाधादि
रूपस्य हेत्वाभासत्वानुपपत्तिर्दुर्वारैवेति वाच्यं॥ विशिष्टनिरूपितविषयितातिरिक्तसंबंधस्यैव विशे
षणीभूतसंबंधिता निरूपकाधिकरण [redacted] नियतत्वोपगमात् तद्धर्मे विशिष्टतन्निरूपितविषयि
तायां तदंशे तद्धर्मप्रकारकत्वमात्रस्यापेक्षितत्वादिच्छाविषयो घट इत्यादिज्ञाने इच्छाविषयत्वविशि
ष्टघटादिनिरूपितविषयितासत्त्वे बाधकाभावात्॥ न च महाकाले महाकालान्यवृत्तित्वविशिष्ट
घटाद्यधिकरणत्वानुपगमे विश्वाधारत्वव्याघात इति शंकनीयं। तादृशविशिष्टनिरूपिताधिकर

द्विशिष्टाधिकरणत्वं महाकाले वर्तत एवेति कथं विशिष्टाभावः प्रतियोगिव्यधिकरण इति वाच्यं विशेष्ये संबंधे
नोभयाधिकरणेऽपि विशिष्टाधिकरणत्वांगीकारे घटपटोभयसंयुक्ते भूतले घटसमवायिकपालसंयुक्तत्वविशिष्टपट
निरूपिताधिकरणत्वप्रसंगात् इच्छाविषयत्वं घटस्यैवेति समूहालंबनेऽपि तादृशविशिष्टाधिकरणत्वसत्त्वापत्त्या प्रतिबंधकतातिरिक्त
वृत्तितया तस्य हेत्वाभासत्वानुपपत्तिस्तदवस्थैवेति २

एताविशेषस्य महाकालेः सत्वेपि घटादेर्घटत्वाद्यवछिन्ननिरूपिताधिकरणतासत्वेनैव सर्वाधार-
त्वोपपत्तेः ॥ अत्र केचित् ॥ कालिकसंबंधेनाधारता महाकालस्यैव न तु सूर्यक्रियादेः इदानीं घट इदा-
नीं पट इत्यादिप्रतीत्याः क्रियादिरूपकालोपाधीनां महाकालनिष्ठाधारतावच्छेदकत्वस्यैवांगीवेदना-
त ॥ अत एव तेषां कालविशेषणतया कालोपाधित्वप्रवादः ॥ तादृशप्रतीत्याः क्रियादावेव घटाद्याधा-
रत्वावगाहित्वोपगमे तादृशप्रतीतीनामनुगताधारतावगाहित्वानुभवविरोधात् ॥ कालत्वेनाखंडो-
पाधिना सर्वक्रियादीनामनुगमेन तादृशानुभवोपपादने महाकालस्यैवाप्रामाणिकतापत्तेरिति
प्राचीनमताभिप्रायेणायमस्याशंका ॥ तथा च सति कालिकसंबंधेन महाकालान्यवृत्तित्वस्यैवा-
प्रसिद्ध्यात द्विशिष्टघटाद्यभावमादाय लक्षणगमनसंभवात् ॥ न च क्रियादेः कालत्वानभ्युपगमे-

वर्थं

गदा० नतदभिप्रायेणचेयंग्रंथः तदाक्षणदृश्यातिरिक्तदृश्यात्मकतायाअभावावर्त्तकतयाअभिधानासंगर
तिरितिवाच्यं॥ तादृशदृश्यात्मकएवकालइतिमतविशेषसूचनार्थकतयातत्संगते॥॥ तस्माच्चक्षणत्वि
त्वेचहेतोर्लक्ष्यतासंपादकत्वेनाभिहितंस्तरहणत्वेव्यभिचारित्वात्॥ अथवाभवतुकालोपाधिरपि
कालिकसंबंधेनाधिकरणंतदधिकरणत्वसाधकश्चइदानींघटइदानींपटइत्यादिःप्रत्ययोव्यव
हारश्चतस्यचाननुगतोपाधिमात्रविषयकत्वेअनुगताधारत्वावगाहित्वानुपपत्त्याक्रियारू
पोपाधिविशिष्टमहाकालस्यघटाधारतावगाहित्वमावश्यकं विशिष्टेघटाद्याधारत्वावगाहि
त्वेविशिष्टांतर्गतविशेषणेपितदवगाहित्वमावश्यकमितिखंडकालस्यकालिकसंबंधेनाधा
रतासिद्धिः॥ एवंचइदानींमहाकालान्महत्त्वविशिष्टेघटइतिप्रत्ययादिःखंडकालेविशि

ष्टाधारतायांमानेनत्वन्यइतितत्रतत्साधकत्वप्रत्ययबलादेवमहाकालान्यवृत्तित्वानिरूपकस्यापि
महाकालस्यविशिष्टाधारत्वसिद्धिर्दुर्वारैव॥तथाचमहाकालेविशिष्टघटाभावोपिविशिष्टवृत्ति-
योगिसमानाधिकरणः॥तादृशप्रतीत्यनभ्युपगमेखंडकालेनप्रतियोग्यधिकरणत्वप्रसिद्धिरि
त्युक्तस्थलेऽव्याप्तिवारणमशक्यमित्याहुः॥अन्येतु॥कालिकःसंबंधःस्वरूपादनतिरिक्तः॥तथा-
थाचखंडकालमहाकालानुयोगिकतादृशसंबंधानांतत्तत्स्वरूपाणांमननुगमकसंबंधत्वावच्छे
दकाभावेनप्रत्येकमेवसंबंधता॥तथाचमहाकालस्वरूपसंबंधेनैवघटादेर्महाकालत्वादिमा
पकतावाच्छेतिदुरुद्धरैवाव्याप्तिः॥तादृशसंबंधेनमहाकालान्यवृत्तित्वस्याप्रसिद्धेरितिवदंति
॥तदसत्॥स्वरूपाणांप्रातिस्विकरूपेणसंबंधत्वेयत्किंचित्खंडकालस्वरूपसंबंधेनसाध्यता-

यातादृशखंडकालमात्रवृत्तिकेहेतुपि वृत्तियोग्यधिकरणाभावात्प्रसिद्धिसंभवान्महाकालवृत्तिर्‌
हेतुकानुधावनस्य निर्बीजत्वापातात्॥ परेतु॥ साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यविषयकानु
मित्यौपयिकस्याप्तावेव वृत्तियोगितावच्छेदकविशिष्टवैयधिकरण्यनिवेशः॥ नतु साध्यतावच्छे
दकोपलक्षितसाध्यवैशिष्ट्यविषयकानुमित्यौपयिकस्यासौऽन्यथा महाकाले पृथिव्यादिवृत्ति
त्वोपलक्षितजात्यनुमित्यनुपपत्तेः॥ साध्यतावच्छेदके वृत्तियोगितावच्छेदकविशिष्टवृत्तियोगि
व्यधिकरणविशिष्टाभाववृत्तियोगितावच्छेदकत्वात्॥ इत्थंच साध्यतावच्छेदकोपलक्षितस्य
यत्र साध्यता तत्रैवाव्याप्तिशंकापरोयं ग्रंथः॥ तत्र यथाश्रुतवृत्तियोगिवैयधिकरण्यस्यैव निवे
शेन महाकालान्यवृत्तित्वविशिष्टघटाभावस्यापि लक्षणाघटकत्वादित्याहुः॥ तदपि न साधु

स्मिन्विशिष्टपदोपादानतद्व्यावृत्त्यादिप्रदर्शनविरोधात्॥ तादृशसंबंधेन॥ प्रतियोगितावच्छेदकसं-
बंधेन॥ साध्यतावच्छेदकसंबंधेनवावक्तव्यम्॥ अभावविशेषणतयाऽभावपूर्वप्रतीकेनविवक्षणीय॥
गगनाद्यभावधारिकेवेति॥ तत्प्रतियोगिनः कालिकसंबंधेनाधिकरणाप्रसिद्ध्यातदनधिकरणत्वाप्र-
सिद्धायाः कालिकसंबंधेनमहाकालवृत्तितायाःअभावस्यतत्रप्रसिद्धत्वादितिभावः॥ ज्ञानवान्स
त्वात्संयोगीसत्वादित्यादौक्रमेणसंबंधविशेषनिवेशोर्यर्थंत्किंचित्सदोपादानयोर्व्यावृत्तिमाहासं- न
त्वाद्यधिकरणेति॥ संबंधविशेषानुपादानेकर्मत्वादौसमवायेनज्ञानाभावप्रतियोगिनोऽवृत्तावपि
विषयतासंबंधेनवृत्तेस्तादृशाभावोनलक्षणघटकः स्यात्कर्मत्वादौसंयोगाभावप्रतियोगिनोऽस-
त्वेपिहेत्वधिकरणवृत्तितयाहेत्वधिकरणवृत्तित्वसामान्याभावासत्वात्सोपिनतथास्यादिति

भावांतरमादायातिव्याप्तिप्रसक्तिरितिभावः॥यद्यपियत्किंचित्सदस्यव्याप्तिर्ज्ञानसाध्यकेपिसंभवतिज्ञा
नस्यसमवायेनाव्याप्यवृत्तितयातत्साध्यकेपिप्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकत्वात्त
थापिप्रसिद्धाव्याप्यवृत्तिसाध्यकेव्यभिचारिणिसंयोगीसत्वादित्यादौतदनुक्तेस्तत्रव्याप्तिर्नसंभवती-
तिशंकास्यात्तन्निराकरणायतत्रतत्प्रदर्शनं॥केचित्तुसंयोगसाध्यकेद्रव्यादिपदद्वयाद्गुणान्यत्व
विशिष्टसत्वाद्धेतुकेसाध्यतावच्छेदकसंबंधस्यैवव्याप्तिप्रदर्शनपरंसंयोगसामान्यस्यैवेत्यपिविष
यतायावृत्तस्यनियामकत्वेप्रतियोगिवैयधिकरण्येसंबंधित्वानिवेशपक्षेपूर्वस्थलीयव्याप्तेस्संगति
रित्यस्वरसादेवतदनुधावनं॥संयोगाभावस्यकालिकसंबंधेनैवसर्वत्रकर्मणिप्रतियोगिसामानाधि
करण्यसत्वादतिव्याप्तिप्रसक्तिरितिवदंति॥तदसत्॥उक्तास्वरसेनपूर्वमपिज्ञानसाध्यकेपरित्यज्य-

स्थलांतरानुसरणादत्रनिर्बीजतावृत्त्यास्थलपरित्यागेसंदर्भविरोधात्॥आदिपदेनहेतोःसाध्यस्यचवि
शेषणादेर्नोपादानस्यायुक्तत्वाच्च॥प्रतियोगितावच्छेदकविशिष्टत्वोपादानस्यपूर्वोक्तस्थलेएवव्यावृ
त्तिंस्मारयति॥प्रतत्वेति॥यद्यपिपूर्वंविशिष्टसाध्यकेतिव्याप्तिप्रदर्शनेनात्रांशेविशेषस्यातिरिक्ततापर
स्येतदसंगतंरस्वरसादुभयसाध्यकातिव्याप्तिर्दर्शिताततथापिद्वंद्वेऽल्पाक्षरपूर्वनिपातनियमात्उभ
यत्वविशिष्टतस्यप्रागभिधाने॥अत्रपूर्वस्थलेद्वित्वावच्छिन्नप्रतियोगितायाव्यासज्यवृत्तित्वापर
गमेतिव्याप्तिर्नसंभवतीत्यस्वरसेनैवद्वितीयस्थलातिव्याप्त्यवतारणेपूर्वाभिप्रायविरोधादनुपा
देयं॥नमनोगुणादिवृत्तीति॥एकविशेषावच्छिन्नेतद्वृत्तित्वसत्त्वेपितद्वृत्तितानवच्छेदकविशेषांत
रावच्छिन्नेतत्तद्वृत्तित्वाभावोऽतएवएकरूपावच्छिन्नेएवतत्तदभावयोर्विरोधनावृत्तेरित्यभिमा

गदा० नः॥ नचैवं विशिष्टांतानुपादानेपि सत्तादौ विशिष्टसत्तात्वादिना गुणाद्यवृत्तित्वसत्वेन विशिष्टसत्ताद्य-
भावस्य लक्षणघटकतया व्याप्तिमास्यप्रसक्तेर्न विशिष्टांतव्यावृत्तिसंभव इति वाच्यं॥ प्रतियोगिनि-
किंचिद्रूपावच्छिन्नत्वे त्वधिकरणयत्किंचिद्व्यक्तिवृत्तित्वाभावस्य लक्षणघटकत्वे सत्तावान् द्रव्यत्वा-
दित्यादावपि सत्तात्वाद्यवच्छिन्नाभावस्य लक्षणघटकत्वापत्त्या व्याप्त्यापत्तेर्वैत्वधिकरणावृत्तित्वस्य-
त्व तद्वृत्तिभिन्नैरूपस्यैव निवेशनीयतया विशिष्टसत्तात्वान्नजातेरित्यादौ विशिष्टसत्ताद्यभावस्य
लक्षणघटकत्वानिर्वाहेणातिव्याप्तिवारणासंभवाद्व्यावृत्तिसंगतेः॥ सामान्यपदप्रयोजनमा-
ह॥ संयोगसामान्य॥ संयोगसामान्यं चेति॥ संयोगी द्रव्यत्वादित्यादौ संयोगत्वावच्छिन्नाभावप्र-
तियोगियत्किंचित्संयोगव्यक्तेर्वैत्वधिकरणयत्किंचिद्घटादिव्यक्त्यवृत्तित्वसत्वेपि तत्प्र-

तियोगिसामान्येतदसत्वेनताहृशाभावस्यलक्षणाघटकतयानाव्याप्तिरित्यर्थः॥विशेष्यवृत्तेर्विशि
ष्टानुयोगिकाभावोऽप्रामाणिकस्तान्यायेनदूषयति॥विशिष्टस्यानतिरिक्तत्वादिति॥तथाचोभय
त्वादिविशिष्टस्यमूर्त्तत्वादेःशुद्धमूर्त्तत्वानतिरिक्ततयामूर्त्तत्वा[illegible]वृत्तेर्मनोवृत्तित्वादेरभावस्यत्र
भयत्वादिविशिष्टेपितस्मिन्नसंभवाद्भूतत्वमूर्त्तत्वोभयवान्मूर्त्तत्वादिसाध्यावतिव्याप्तिर्विशिष्टा
नोपादानेपिदुर्वारैवेतिभावः॥नचभूतत्वमूर्त्तत्वोभयंनमनसिगुणान्यत्वविशिष्टसत्तानगुणे
त्यादिसर्वानुभवसिद्धप्रतीतिबलाद्वित्वविशिष्टसत्तात्वाद्यवच्छिन्नमनोगुणादिवृत्तित्वाभाव
सिद्धेरावश्यकत्वान्नातिव्याप्तिरितिवाच्यं॥ताहृशप्रतीत्यामनोगुणाद्यधिकरणकद्वित्वविशि
ष्टसत्तात्वाद्यवच्छिन्नाभावस्यैवावगाहनात्॥ज्ञातेनकिंचित्सवेतामतिनिश्चयदशायांजाते

गदा०

नञ्तत्वमूर्त्तत्वोभयंनवाविशिष्टसत्ताइतिप्रतीतिवत्मनसिगुणोनकिंचित्समवैतीतिभ्रमदशाया
मपितादृशप्रतीतेरानुभविकतयामनोगुणादिसमवेतत्वाभावस्यतद्विषयकत्वासंभवेनमनोगुणाद्य
धिकरणकाभावस्यतद्विषयतायाश्चावच्छेदकत्वात्तादृशभ्रमाभावकालीनतथाकारप्रतीतावपि
तस्यैवविषयत्वौचित्यात्॥अन्यथाकल्पनागौरवापत्तेः॥अतत्वमूर्त्तत्वोभयेनमनोवृत्तिगुणाद्य
न्यत्वविशिष्टसत्तानगुणवृत्तिरित्यादिप्रत्ययाश्चतादृशोभयत्वविशिष्टसत्तात्वादौमनोगुणादिवृ
त्तित्वावच्छेदकत्वाभावंतादृशवृत्तित्वेतादृशोभयत्वविशिष्टत्वाद्यवच्छेद्यत्वाभावंवापगाहते।तत्र
तादृशाभावस्यक्रसत्वात्॥नचहेत्वधिकरणवृत्तितानवच्छेदकस्यप्रतियोगितावच्छेदकस्यप्रतियो
गितावच्छेदकत्वमेवविवक्षणीयं॥उभयत्वाद्यवच्छिन्नाभावप्रतियोगि+यत्किंचित्।तावच्छेदकोदेकै

भयत्वादेश्च मनोगुणादिवृत्तितानवच्छेदकत्वात्तादृशाभावसंग्रहेणाना ।। नाव ऽ तिव्याप्तिरितिवाच्यं ।। गु-
णान्यत्वविशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकस्यवैशिष्ट्यसहितसत्तात्वस्यगुणादिवृत्तितावच्छेद-
कभुवसत्तात्वाद्यनतिरिक्ततयातदनवच्छेद - .त्वासंभवेनोक्तविवक्षयापितादृशाभावसंग्रहा-
संभवात् ।। यदभावीयप्रतियोगितावच्छेदकतायांयत्किंचिद्धेत्वधिकरणवृत्तितावच्छेदकत्वपर्या-
प्त्यवच्छेदकावच्छिन्नपर्याप्तताविरहस्तादृशाभावनिवेशोदर्शिता तिव्याप्तिपरीहारः संभवतीत्याशं-
क्यदूषणांतरमाह ।। समवायेऽतेति ।। जातिमन्निष्ठतादृशाभावेति ।। जातिमन्निष्ठोयोघटत्वाद्यभाव-
स्तस्यैवपटाद्यसमवेतप्रतियोगिकत्वेनतन्निष्ठप्रतियोगितायांजातित्वस्यानवच्छेदकत्वादित्यर्थः ।। जा-
तिमद्वृत्तेर्जातित्वावच्छिन्नाभावस्यतादृशत्वंनसंभवतीतिस्फुटयति ।। जातिश्चान्यैवेतितादृशासंवे

गदा०

धेन॥समवायेन॥स्वत्वसंनिवेशेरिति॥तथाचजातिमद्वृत्तिर्योऽभावस्तत्प्रतियोगिसामान्येहेतुमद्यत्किंचित्स
देनजातिमन्त्वमेवोपादायावृत्तित्वांतर्घटनीयंतच्चनसंभवतीतिप्रतियोगित्वसंनिवेशात्तद्वत्त्वसंनिवेशितिनासो
लक्षणघटकइतिभावः॥जातेर्व्याप्यवृत्तितयातत्साध्यकेप्रतियोगिवैयधिकरण्यविशेषणस्यप्रयोजनवि
रहेणनिवेशेनोक्तदोषानवकाशइत्यव्याप्यवृत्तिसाध्यकेएवातिव्याप्तिमाह॥संयोगादीति॥स्वातिव्याप्ति
रिति॥संयोगत्वाद्यवच्छिन्नाभावस्यहेत्वधिकरणयत्किंचिद्व्यक्तिसमवेतप्रतियोगिसामान्यकत्वासंभवे
नलक्षणघटकत्वादितिभावः॥तदसंभवमेवस्फुटयति॥स्वद्रव्यइति॥हेतुमतीति॥सामान्यादावित्य
र्थः॥स्वत्वसंनिवेशेरिति॥तथाचयत्किंचिद्व्यक्तौस्यंतेननसामान्याद्युपादानसंभवइतिभावः॥द्रव्यइति॥त
थाचद्रव्यमपियत्किंचिद्व्यक्तिपदेनोपादायतादृशाभावस्यनतथात्वंशंकोपपादानमितिभावः॥साध्य

तावच्छेदकसंबंधसामान्येनुभयाभावस्याविवक्षितत्वादितियोजना॥तथाचस्वप्रतियोगितावच्छेदकवि
शिष्टप्रतियोगिकत्वहेत्वधिकरणाभूतयत्किंचिदन्यतमानुयोगिकत्वसामान्योभयाभाववत्साध्यताव
च्छेदकसंबंधसामान्यकत्वं॥अभावेस्वप्रतियोगितावच्छेदकेत्यत्रस्वावच्छेदकत्वंप्रक्षिप्यतादृशाभाव
वत्संबंधसामान्यकत्वंप्रतियोगितायांवाविशेषणंदेयंइतिभावः॥जलादिसंयोगेवह्न्यादिप्रतियो-
गिकत्वधर्मवदनुयोगिकत्वेनोभयाभावसत्वेपिसाध्यतावच्छेदकसंबंधसामान्यांतर्गततत्तद्भूमा-
धिकरणानुयोगिकवह्निसंयोगेवह्निप्रतियोगिकत्वतत्तदधिकरणानुयोगिकत्वोभयाभावासत्वा
चवह्न्यभावस्यलक्षणाघटकतेतिघटाद्यभावमादायवह्निमान्धूमादित्यादौलक्षणासमन्वयः॥घ
टवान्महाकालत्वादित्यादौपुनरवृत्तिगगनादेरभावएवलक्षणाघटकः॥कालिकसंबंधसामान्येन-

गदा०

स्वप्रतियोगिकत्वाभावेनैवोभयाभावसौलभ्यादित्यधिकरणानुयोगिकसाध्यतावच्छेदकसंबंधसामा-
न्येनिरुक्तप्रतियोगिकत्वाभावनिवेशेजातिमान्मेयत्वादित्यादावतिव्याप्तिवारणमशक्यं॥सा
मान्यानुयोगिकसमवायाप्रसिद्ध्याजात्याश्रयानुयोगिकसमवायेचजात्यादिप्रतियोगिकत्वसत्त्वेन
जातित्वाद्यवच्छिन्नाभावस्यप्रतियोगिव्यधिकरणत्वानुपपत्तेः॥एवंनिरुक्तप्रतियोगिप्रतियोगिकसा
ध्यतावच्छेदकसंबंधसामान्येइत्यधिकरणपक्षेऽपिचेदनुयोगिकत्वाभावनिवेशोघटवान्महाका
लत्वादित्यादावव्याप्तिवारणमशक्यं॥गगनत्वविशिष्टप्रतियोगिककालिकसंबंधाप्रसिद्धेर्गगना
भावस्यापिप्रतियोगिव्यधिकरणत्वानुपपत्तेरित्युभयाभावानुसरणं॥यत्किंचित्पदप्रयोजनमा-
ह॥धूमसंयोगइति॥अयोगोलकानुयोगिकत्वस्यप्रतिविरहान्नातिप्रसंगइत्यग्रेतनेनसंबंधः॥सा-

ध्मतावच्छेदकसंबंधसामान्यांतर्गतधूमसंयोगेधूमप्रतियोगिकत्ववह्निमदनुयोगिकत्वयोरुभयो
रेवसत्वेनतत्सामान्योभयाभावस्यदुर्घटत्वात्॥यत्किंचित्पदानुपादानेधूमवान्वह्नेरित्यत्रातिव्या
प्तिःस्यात्।हेत्वधिकरणस्यहेतुमत्वेननिवेशः।किंतुतद्व्यक्तित्वेनयत्किंचिदेकहेतुमद्व्यक्तेर्निवेशइ
स्येतल्लाभार्थकतदुपादानेहेत्वधिकरणायोगोलकानुयोगिकत्वस्यधूमसंयोगेप्यभावादन्यसंयोगे
चधूमप्रतियोगिकत्वस्याभावात्॥संयोगसामान्यस्यैवोभयाभाववत्वात्॥धूमत्वावच्छिन्नाभावोपि
लक्षणघटकइतिनातिप्रसंगइत्यर्थः॥प्रतियोगितावच्छेदकविशिष्टार्थकनिरुक्तपदप्रयोजनंसं
योगेनचैत्रान्यत्वविशिष्टदंडत्वेनचैत्रनिष्ठदंडसाध्यकेतदंडहेतौसमवायेनविशिष्टसत्तासा
ध्यकेजातिरूपहेतौचातिव्याप्तिवारणरूपंदर्शयति॥चैत्रान्यत्वेति॥निरुक्तपदानुपादानेसंयो

गदा०

गसामान्यांतर्गतेचैत्रनिष्ठेतद्द्वंद्वसंयोगेहेत्वधिकरणेचैत्रानुयोगिकत्वंचैत्रान्यत्वविशिष्टेतद्द्वंद्वाभावप्र
तियोग्येतद्द्वंद्वप्रतियोगिकत्वयोःसमवायसामान्यांतर्गतगुणानुयोगिकसत्तासमवायेचहेत्वधिकरण
गुणानुयोगिकत्वविशिष्टसत्ताभावप्रतियोगिसत्ताप्रतियोगिकत्वयोर्द्वयोरेवसत्वेचतादृशाभावस्य
लक्षणाघटकतानस्यात्इतिप्रसक्तातिप्रसक्तेस्तदुपादानात्त्ववकाशः॥चैत्रेगुणादौचसंयोगेनस
मवायेनविशिष्टद्वंद्वविशिष्टसत्तावैशिष्ट्यसत्वस्यात्॥तदनुयोगिकसंयोगसमवाययोर्विशिष्टद्वंद्ववि
शिष्टसत्तात्वावच्छिन्नप्रतियोगिकत्वानभ्युपगमेनान्यानुयोगिकयोःस्वतयोःस्वतयोश्चैत्रगुणाद्यनुयोगि
कत्वाभावेनोभयाभावस्याक्षततयाविशिष्टसाध्याभावस्यापिलक्षणाघटकत्वादित्यर्थः॥त्वयात्रसं
योगेनघटादौसाध्येघटत्वादावतिव्याप्तिः॥संयोगसामान्यांतर्गतघटपटादिसंयोगेघटाद्यनुयोगि

कत्वघटादिप्रतियोगिकत्वोभयसत्वेनघटादिनिष्ठघटाद्यभावस्यलक्षणाघटकत्वात्॥नचस्व
स्मिन्संयोगेनस्वविशिष्टबुध्यनुदयात्॥अन्यत्रघटविशिष्टधीमात्रनियामकेघटसंयोगेघटप्रति
योगिकत्वमात्रंघटेऽन्यविशिष्टधीमात्रनियामकसंयोगेचतदनुयोगिकत्वमात्रमितिघटानुयोगि
कत्वतत्प्रतियोगि-त्वोभयंनकुत्रापिसंयोगेऽस्तिनहिसमवायेनसंयोगाधिकरणत्वमेवसंयो
गानुयोगित्वंयेनघटसमवेतसंयोगमात्रस्यैवघटानुयोगिकत्वंस्यात्॥तथासतितत्संबंधानुयोगि
तायाएवतद्विशिष्टबुद्धिविषयताप्रयोजकत्वेनस्वस्मिन्नपिस्वविशिष्टबुध्यापत्तेर्दुर्वारत्वात्किंतुसं
बंधांतरमेवेतिवाच्यं॥येनसंबंधेघटेऽन्यविशिष्टधीस्तेनैपिसंबंधेनान्यत्रकदाचित्घटविशिष्टबुद्धि
जननादेकस्यैवसंयोगेघटानुयोगिकत्वघटप्रतियोगिकत्वयोरावश्यकत्वात्॰यस्मिन्संबंधेयस्य

तियोगिकत्वविशिष्टयदनुयोगिकत्वं तत्संबंधेन तस्यैव नतु विशिष्टत्वमिति. स्वप्रतियोगिकत्वविशिष्ट
त्वस्य योगे स्वानुयोगिकत्वानुपगमेन स्वस्मिंस्तेन स्वविशिष्टत्वमापत्त्यनवकाशादिति चेन्न. संयोगेनाधिक
रणत्वेनाधेयस्यैव विशिष्टबुद्धिर्जन्यते न त्वाधेयांशेनाधारस्य आधाराधेयभावयोरेव संसर्गेनापन्नयोर्द्वि वा
त्वनियामकसंयोगिनोश्चस्वसंयोगेन विशिष्टबुद्धेरप्रामाणिकत्वात् आधेयत्वानुपस्थितिकालीनभू
तले घट इत्यादि प्रत्यये घटादाघटांशे तल्लादेः प्रकारत्वेपि आधेयतायाः एव संसर्गतोपगमात् नतु सं
योगस्य एवं सति इत्यनियामकस्य गगनादिसंयोगस्य संबंधतानुपपत्तिर्विशिष्टबुद्धिनियामक
स्यैव तथात्वादिति चेत् का क्षतिः ॥ एवं चान्वयेन संयोगेनान्यत्र घटविशिष्टबुद्धिर्जन्यते ॥ घटस्य तत्संयो
गाश्रयानाधारत्वेन घटेनैतेनान्यविशिष्टबुद्धिर्जन्यत इति संयोगमात्रएव तत्प्रतियोगिकत्वतदनु

योगिकत्वोभयाभावस्याक्षतत्वात्॥ अथ यद्घटस्याधोवस्थितपटे येन संयोगेन घटविशिष्टबुद्धिर्ज
निता तेनैव च संयोगेन पटेन समं परिहृत्यस्यापि तेन घटे पटविशिष्टबुद्धिरपि जन्यते॥ तत्संयोगे पटानु
योगिकत्वघटप्रतियोगिकत्वयोर्नैरावरूपकतया संयोगेन घटसाध्यके तद्घटतत्पटान्यतरत्वादाव
तिव्याप्तिर्दुर्वारैवेति चेदेवं सति साध्यतावच्छेदकसंबंधानुयोगितासामान्ये निरुक्तप्रतियोगिप्रति
योगिकत्वविशिष्टनिरूपितत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठत्वोभयाभाव एव विवक्षणीयः
॥ स्वस्मिन्स्वविशिष्टबुद्ध्यनुदयेन स्वप्रतियोगिकत्वविशिष्टसंयोगनिरूपितत्वस्य स्वनिष्ठानुयोगिता
यामसत्वात्संयोगीयानुयोगितासामान्ये घटप्रतियोगिकत्वविशिष्टनिरूपितत्वतद्घटनिष्ठत्वोभया
भावोऽक्षत एवेति॥ एवं च यदत्र कल्प्ये समवायैक्यमतेऽतिव्याप्तिमुद्भावयिष्यति तत्पक्षाङ्कताभिप्रायेण

तिध्येयम्॥ अथ द्रव्यत्वादिकं प्रतिपर्याप्तिसंबंधेन वित्वादेर्व्यापकत्वापत्तिर्हेतुमतएकैकद्रव्यस्य प
र्याप्तिसंबंधेन वित्वाद्यनधिकरणत्वेपि वित्वादिपर्याप्तौ हेत्वधिकरणतत्तद्व्यक्त्यनुयोगिकत्वाभावास
त्वादिति द्रव्यत्वादिना पर्याप्तिसंबंधेन गगनादौ वित्वाद्यनुमापत्तिरिति चेन्न। तद्रूपतावच्छेदकानति
रिक्तवृत्तित्वाविशेषितपर्याप्तेः क्वचिदपि संबंधत्वानभ्युपगमेन तादृशपर्याप्तिसंसर्गकानुमितेरा
पादनासंभवात्॥ गगनत्वाद्यनतिरिक्तवृत्तित्वविशेषितपर्याप्तेर्वित्वादिप्रतियोगिकत्वाभावेन
वित्वादिनिष्ठव्यापकत्वाघटकतया तादृशसंबंधेनापि तदनुमानापत्त्यनवकाशात्॥ यत्तु हेत्वधि
करणयत्किंचिद्व्यक्त्यनुयोगिकत्वस्य स्थले हेतुमत्त्वपर्याप्त्यवच्छेदकयत्किंचिद्धर्मावच्छिन्नानुयोगिक
त्वं निवेश्य वित्वादिपर्याप्तौ च द्रव्यत्वादिपर्याप्त्यवच्छेदकैकैकमात्रधर्मावच्छिन्नानुयोगिकत्ववि

रत्वात् न तेन संबंधेन वह्नित्वादिद्रव्यत्वादिरूपप्रत्येकपर्याप्तधर्मव्यापकतापत्तिः ॥ हेतुमद्वृत्तियत्किंचिद्धर्मा
वच्छिन्नानुयोगिताकत्वनिवेशेऽप्येवं द्रव्यवस्तुत्वादिसादौ पर्याप्तिसंबंधेन हेतुसाध्याभावेऽव्याप्तिः ॥ हेतु
मदेकमात्रवृत्तिधर्मावच्छिन्नानुयोगिताकत्वस्य वस्तुत्वादिपर्याप्तावसत्त्वेन तादृशासाध्याभावेन निरू
पकप्रतियोगिवैयधिकरण्यस्य दुर्वारत्वात् ॥ अतो हेतुपर्याप्त्यवच्छेदकयत्किंचिद्धर्मेण निवेश इति ॥ त
न्न मनोरमं ॥ एतादृशरीत्यान्त्यकल्पपरिष्कारेऽपि प्रतियोगिमद्भेदे हेतुपर्याप्त्यवच्छेदकावच्छिन्नानु
योगिकत्वस्याग्रिमकल्पविवक्षणे आकाशः आकाशघटोभयत्वादित्यादावतिव्याप्तेर्दुर्वारत्वा
त् ॥ आकाशत्वाद्यवच्छिन्नभेदस्य दर्शितहेतुपर्याप्त्यवच्छेदकतदुभयवृत्तिधर्मावच्छिन्नेऽसत्त्वात् प्रति
योगिवृत्तिधर्मस्य भेदाधिकरणतानवच्छेदकत्वात् ॥ न च व्यासज्यवृत्तिधर्मसाध्यके ईदृशरीतिरूपादे

यानाश्चेतिवाच्यं॥ आकाशत्वादेराकाशघटादौ व्यासज्यवृत्तित्वभ्रमदशायां तदवच्छिन्नभेदस्य
प्रत्येकदेत्त्वधिकरणवृत्तित्वग्रहेपि आकाशघटोभयत्वादिहेतुनाऽऽकाशत्वाद्यनुमित्युत्पत्तातन्नि
र्वाहाय तत्रापि साधनपर्याप्त्यवच्छेदकावच्छिन्नाधिकरणताकप्रतियोगिमद्भेदघटितव्याप्तिज्ञानहेतुताया
वाच्यतया तत्राप्यनुमित्यौपयिकव्याप्तिप्रसिद्ध्यापत्तेः॥ तस्माद्वित्वादिसाध्यकद्रव्यत्वाकाशत्वादि
कं सद्धेतुरेव॥ इमेवद्द्वस्त्वित्वादित्यादौऽव्याप्तिवारणाय यत्पर्याप्त्यतिरिक्तस्वरूपसंबंधेन प्रतियोग्य
धिकरणत्वावच्छिन्नस्य भेदावद्धेतुमतिनिवेशनीयः॥ न तु प्रतियोग्यवच्छिन्नभेदः॥ प्रतियोगिमद्वृ
त्तिधर्मवत्त्वं वा॥ तेन प्रत्येकवृत्तिवह्नित्वाद्यवच्छिन्नभेदमादाय न तदभावस्य प्रतियोगिवैयधिकर
ण्यमित्यवसारं॥ इदं तु बोध्यं॥ साध्यतावच्छेदकावच्छिन्नाभावनिरूपितत्वविशिष्टसाध्यवन्निष्ठाधि

करणताभिन्नहेतुमन्निष्ठाधिकरणताकत्वमेव प्रतियोग्यधिकरणहेतुसमानाधिकरणेति प्रती-
कार्थः॥ महाकालो घटवान्महाकालत्वादित्यादौ चैतादृशविशेषणाकांताभावाप्रसिद्धिः॥ का-
लिकसंबंधावच्छिन्नघटाद्यभावस्यैव तथात्वात्तन्निष्ठतदधिकरणतायां साध्याभावाधिकरणताभि- ।हेतु
न्नत्वसत्वेन विशिष्टभेदसत्वात् इत्युभयाभावघटितप्रतियोगिवैयधिकरण्यानुधावनं दीधितिकृ-
तामफलमेव॥ एवं = प्रतियोगिवैयधिकरण्यानुधावनं दीधितिकृतामफलमेव॥ एवं च प्रतियोगि-
वैयधिकरण्यस्य यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत इत्यादिक्रमेण निर्वच-
नेऽननुगमात्॥ प्रतियोगिवच्छेदकत्वत्वावच्छिन्नाभावकूटनिवेशनेऽप्यतिदुर्ज्ञेयतेति दूषणांतरमनव-
काशं इति दिक्॥ ननु गगनादेरपि कालिकसंबंधेन कालवृत्तित्वमावश्यकं॥ अन्यथा तेषां परमार्थस-

त्वानुपपत्तिः॥ तस्य कालवृत्तित्वरूपत्वात्॥ एवं कारणत्वानुपपत्तिश्च॥ तस्य पूर्वकालवृत्तित्वघटितत्वा
त्॥ अवृत्तित्वपदवाच्यश्च तच्च कालिकातिरिक्तसंबंधेनावृत्तित्वपरः॥ इत्थं च कालिकसंबंधसामान्येन ग
गनादिप्रतियोगिकत्वमहाकालानुयोगिकत्वोभयाभावोपि दुर्लभ इति तदभावेपि प्रतियोगिवैयधिक
रण्यं दुर्घटं॥ एवं विषयितया घटादिसाध्यके नित्यज्ञानत्वादिहेतावपि प्रतियोगिव्यधिकरणाभावाप्रसि
द्ध्याऽव्याप्तिर्दुर्वारैव॥ हेतुमति भगवज्ज्ञानादौ विषयितासंबंधेन वस्तुमात्रस्यैव संबद्धत्वात् विषयितासंबंध
सामान्ये हेत्वधिकरणानुयोगिकत्वघटितोभयाभावस्य दुर्घटत्वादित्यालोच्य कल्पांतरमाह॥ स्वरूपसं
बंधेनेत्यादिना॥ स्वरूपसंबंधेन कालिकविशेषणतासंबंधेन॥ निरुक्तप्रतियोग्यनधिकरणेति॥ प्र
तियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणेत्यर्थः॥ एवं च स्वावच्छिन्न

त्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभाववत्त्वादृशप्रतियोगितासामान्यकोयोधर्मस्तदवच्छि-
न्नसामानाधिकरण्यंतद्धर्मावच्छिन्नविधेयकानुमितौपयिकव्याप्तिरितिपर्यवसितं॥ घटवान्महा
काशत्वादित्यादौसमवायादिनाघटाद्यभावीयप्रतियोगितैवप्रतियोगितावच्छेदकसंबंधेनप्रति
योगिवैयधिकरण्यनिरूपिकाप्रसिद्धातादृशप्रतियोगितासामान्यकालिकसंबंधावच्छिन्नत्वाभावा
देवनिरुक्तोभयाभाववत्त्वमक्षतमितिलक्षणसमन्वयः॥ धूमवान्वह्नेरित्यादौसंयोगादिनाघटा
द्यभावप्रतियोगितायांसमवायादिनाधूमाद्यभावप्रतियोगितायांचधूमत्वाद्यवच्छिन्नत्वसाध्यता
वच्छेदकसंबंधावच्छिन्नत्वोभयाभावसत्वेपिसाध्यतावच्छेदकसंबंधेनसाध्यतावच्छेदकावच्छिन्नप्र
तियोगितायाअपिनिरुक्तप्रतियोगितासामान्यांतर्गतत्वेनतत्रोभयाभावासत्वान्नातिव्याप्तिः॥ धूमा-

गदा०

दिसमानाधिकरणस्यसमवायादिनावन्ह्याद्यभावस्यसंयोगादिनाघटाद्यभावस्यचप्रतियोगितायां
साध्यतावच्छेदकधर्मावच्छिन्नत्वतादृशसंबंधावच्छिन्नत्वयोरेकैकसत्वेप्येकैकाभावेनवित्वावच्छिन्ना-
भावसत्वाल्लक्षणसमन्वयः॥यद्यपितादृशाभावीयसाध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगितासामा-
न्यसाध्यतावच्छेदकसंबंधावच्छिन्नत्वमात्रस्याभावनिवेशेपिसामंजस्यं इदंवाच्यत्वेयत्वादितादौवाच्यत्व
त्वावच्छिन्नभेदादिप्रतियोगिता साध्यतावच्छेदकसंबंधावच्छिन्नत्वविरहमादायप्रमेयसामान्यसा-
ध्यकेसंयोगेनजन्यत्वविशिष्टघटादिहेतौसाध्यतावच्छेदकावच्छिन्नभेदस्यसंयोगसमवायकालिकवि-
शेषणतासंबंधावच्छिन्नतदवच्छिन्नाभावस्यचहेतुमत्यसंभवेपिविषयितासंबंधावच्छिन्नतदवच्छिन्ना-
भावस्यज्ञानमात्रवृत्तिहेतौचसंयोगसंबंधावच्छिन्नतदवच्छिन्नाभावस्यतद्वृत्तित्वमित्यातदीयसाध्यताव-

छेदकावच्छिन्नप्रतियोगितायामुक्तसंबंधावच्छिन्नत्वस्याविरहमादाय लक्षणसमन्वयसंभवात्तथा
पि हेतुमति सर्वैरेव संबंधैः साध्यवत्वे । न तु कस्यामपि तादृशाभावप्रतियोगितायां साध्यतावच्छेद-
कावच्छिन्नत्वमिति भ्रमदशायामप्यनुमितेरानुभविकतया दानीं च साध्यतावच्छेदकावच्छिन्नत्वेन ता
दृशाभावप्रतियोगित्वज्ञानासंभवात्तद्विशेषितप्रतियोगिताधर्मिकसंबंधविशेषावच्छिन्नत्वाभावज्ञा
नस्यानुमितिहेतुतानसंभवतीत्युभयाभावानुसरणं । प्रमेयत्वावच्छिन्नसाध्यकस्थले साध्यतावच्छेद
कावच्छिन्नाभावाप्रसिद्ध्यातदवच्छिन्नत्वमप्यप्रसिद्धमिति शंकां परिहरति ॥ समवायेति ॥ यद्यपि विष
यतादावपि तदवच्छिन्नत्वप्रसिद्धिसंभवस्तथापि विषयतादिनिष्ठतत्प्रकारकत्वादिरूपतदवच्छेद
तयाप्रतियोगितानिष्ठायास्स्वरूपानतिरिक्तत्वाद्गुरुधर्मनिरूपितविलक्षणावच्छेदकतायाएकजा

गदा० तीयत्वस्याप्रामाणिकत्वेऽतिव्याप्तिभयेनप्रतियोगितायांयादृशमवच्छिन्नत्वंतस्यैवलक्षणेनिवेशःका
र्यत्वाभिप्रायेणतादृशावच्छिन्नत्वस्यैवप्रसिद्धिर्दर्शिता पूर्वकल्पेदोषांतरमपिदर्शयति॥ अतएवेति।
पूर्वकल्पंपरित्यज्यैतत्कल्पावलंबनादेवेत्यर्थः॥ समवायस्योभयत्वेहेतुरेकत्वेनेति॥ उभयत्वेपीत्य
नेनद्रव्यत्वाभावेदेत्वाधिकरणगुणादौउभयाभावघटितप्रतियोगिवैयधिकरण्यासंभवःसूचितः॥
द्रव्यंजातेरित्यादाविति। नातिव्याप्तिरित्यग्रिमेणसंबंधः॥ यद्यपिप्रतियोगितावच्छेदकसंबंधेनप्र
तियोग्यनधिकरणत्वंप्रतियोगिनिरूपिततादृशसंबंधाननुयोगित्वंवाधिकरणतानिवेशेतादा
त्म्येनसाध्यतायांव्यभिचारिण्यतिव्याप्तेः॥ तथाचसमवायैकपक्षेगुणादेरपिद्रव्यत्वप्रतियोगिकस
मवायानुयोगितानिष्प्रत्यूहेवेत्येतत्कल्पेपिसमवायेनद्रव्यत्वाभावस्यलक्षणाघटकत्वान्निर्वाहः

तथापिस्वप्रतियोगिप्रतियोगिकत्वविशिष्टताद्दशसंबंधनिरूपितविलक्षणानुयोगितायाएवनिवे
शनीयतयागुणादिनिष्टसमवायानुयोगितायाश्चद्रव्यत्वीयत्वविशिष्टानिरूपितत्वेननदोषः॥वस्तुत
ःप्रतियोगितावछेदकसंबंधेनविशिष्टप्रतियोग्यवछिन्नभेदोहेतुमद्विशेषणं॥एवंचप्रतियोगितावछे
दकविशिष्टप्रतियोगिकत्वविशिष्टसंबंधाननुयोगिन्येवभेदाभ्युपगमात्॥समवायैक्यमतेपिसम
वायेनस्पगुणादावक्षतत्वात्द्रव्यत्वाद्यभावस्यगुणादौसमवायेनप्रतियोगिवैयधिकरण्यमव्याह
तमेवेति॥इदमवधेयम्॥समवायकालिकविशेषणताद्युभयसंबंधेनयत्रद्रव्यत्वादेःसाध्यताके
वलसमवायादिनाद्रव्यत्वादेर्हेतुतातत्रसाध्यतावछेदकसंबंधसामान्यांतर्गतगगनानुयोगिकस व्य
मवायादावुक्तोभयाभावासत्वेनातिव्याप्तिदुर्वारा॥साध्यतावछेदकसंबंधतावछेदकरूपविशि

गदा०

ष्टनिरूपितानुयोगितासामान्ये निरुक्तप्रतियोगिप्रतियोगिकसंबंधनिरूपितत्वस्य चाधिकरणीभूतयत्किं
चिद्व्यक्तिनिष्ठत्वोभयाभावविवक्षणेन तादृशदोषवारणे च निरुक्तप्रतियोगिप्रतियोगिकसंबंधनिरू-
पितत्वस्याने निरुक्तप्रतियोगिप्रतियोगिकत्वविशिष्टसंबंधनिरूपितत्वनिवेशेन द्रव्यं जातेरित्यादाव-
घातिव्याप्तिः शक्यते वारयितुमित्युक्तमिति॥ इदं त्ववधेयम्॥ स्वसमवायिसंयोगादिसंबंधेन यत्र लौहि-
त्यादेः साध्यता तत्र सर्वे तावत्स्फटिकत्वादावुभयाभावघटितप्रतियोगिवैयधिकरण्यनिवेशपक्षे-
स्फटिकाद्यनुयोगिकजपादिसंयोगे लौहित्यादिनिरूपितपरंपरासंबंधघटके समवायादौ स्वप्रतियोगि-
कत्वाभावेन हेतुमन्निष्ठसाध्याभावप्रतियोगिवैयधिकरण्यपदद्वारा॥ साक्षात्परंपरासाधारणतत्प्रतियो-
गिकत्वं चानुगतं दुर्वचं॥ तादृशस्य तस्य निवेशेऽप्यालोकाद्यनुयोगिकवन्हिसंयोगादेरपि धूमादेः प

परंपरासंबंधघटकत्वसंभवेतनधूमादिप्रतियोगिकतयातन्निष्ठधूमाद्यभावेपिप्रतियोगिवैयधिकर
ण्यानुपपत्तेः॥ नचतादृशसंयोगसंयोगत्वपुरस्कारेणसाक्षाद्वह्नित्वप्रतियोगिकत्वविरहेपिसाध्यता
वच्छेदकसंबंधतावच्छेदकस्वसमवायिसंयोगत्वपुरस्कारेणतत्प्रतियोगिकत्वस्यास्वीक्रियतइतिवा
च्यं॥ मानाभावात्॥ समवायस्यतत्प्रतियोगिकतयैवतद्घटितपरंपरायाःसंबंधतोपपत्तेः॥ यादृशसंबं
धेयत्प्रकार[illegible]प्रतियोगिकत्वयद्विशेष्यानुयोगिकत्वोभयाभावस्तादृशसंबंधेनतत्प्रकारकतद्विशे
ष्यकज्ञानान्यज्ञानस्यैवभ्रमात्वात्॥ स्वसमवायिसंयोगेचोभयसत्त्वेनोभयाभावासत्त्वात्॥ नचसंबंध
भेदेनव्यापकताभेदात्स्वसमवायिसंयोगादिरूपपरंपरासंबंधेनयत्रसाध्यतातत्रपरंपराघटकवि
शेष्यांशेस्वप्रतियोगिप्रतियोगिकत्वमुपेक्ष्यस्वप्रतियोगिप्रतियोगिकपरंपराघटकविशेषणसमवा

गदा०

यादिमत्त्वप्रतियोगिकत्वस्यैवाभावो निवेशनीयः परं(प)रात्तिहेत्वावपि ईदृशाशीत्वोद्धमिति नानुपपत्तिरिति वा-
च्यं॥ यत्र कालिकसंबंधघटितसामानाधिकरण्यसंबंधेन घटादिकं साध्यं महाकालवृत्तित्वादिकं हेतुस्त-
त्र कालिकसंबंधेन गगनादेरवृत्तित्वपक्षे प्रतियोगिवैयधिकरण्याप्रसिद्धेर्दुर्वारत्वात्॥ गगनादिनिरू-
पितस्य तादृशसामानाधिकरण्यरूपपरंपरासंबंधघटकविशेषणतांशस्य कालिकसंबंधस्याप्रसिद्धेः
॥ विशेषणान्तसंबंधे विशिष्यानिवेश्य निरुक्तप्रतियोगिप्रतियोगिकसंबंधत्वेन संबंधं निवेश्य तद्व-
त्प्रतियोगिकत्वनिवेशे कालिकविशेषणतावत्समवेतत्वरूपपरंपरासंबंधेन द्रव्यत्वादिसाध्यके द्र-
व्यवृत्तित्वादिहेतावतिव्याप्तिः॥ तत्र साध्यतावच्छेदकपरंपरासंबंधघटकविशेषणाभूतसमवेतत्वांशे
व्यभिचारनिरूपकाधिकरणशाहृज्ञाभनाद्यनुयोगिकत्वद्रव्यत्वप्रतियोगि प्रतियोगिकत्वउभयाभाव

स्वसंबंधघटकविशेषणांशे निवेशे स्वसमवायिसमवेतत्वसंबंधेन जातिसाध्यकमेयत्वादिहेतावतिव्याप्ति
ःतत्र हेत्वधिकरणानुयोगिकविशेष्यताभूतसंबंधाप्रसिद्धेः॥ न च परंपरासंबंधघटकविशेष्यांशे हेत्वधि
करणानुयोगि+कसंबंधत्वावच्छिन्नद्रव्यत्वसमवायवृत्तिप्रतियोगिकत्वोभयसत्वेन द्रव्यत्वाभावासंग्रहात्॥
हेत्वधिकरणानुयोगिकविशेष्यताभूतसंबंधप्रतियोगप्यनुयोगिका+त्वपरंपराघटकविशेषणीभूतसंबंधव
वृत्तिनिरूपितत्वनिरुक्तप्रतियोगिप्रतियोगिकसंबंधवृत्तिनिरूपितत्वानां त्रयाणामभावविशेषणान्न दोषः॥ग
गनादिनिरूपितकालिकसंबंधावसिद्धावपि तन्निरूपितताद्रात्म्यविषयतादिसंबंधवृत्तिनिरूपितत्वप्र
सिद्धायां तत्त्वावच्छिन्नाभावस्योलभ्यादिति वाच्यं॥ कालिकसंबंधघटितसामानाधिकरण्यसंबंधेन जन्य
ज्ञानादेः साध्यत्वे व्यभिचारिणि कालवृत्तित्वादावतिव्याप्त्यापत्तेः॥ व्यभिचारनिरूपकाधिकरणावलय

गदा०

त्वादिनिष्ठायामुक्तसंबंधघटकाधेयतायां कालिकसंबंधवन्निरूपितत्वसाध्यीयविषयतासंबंधवन्नि-
रूपितत्वयोः सत्वेनाधेयतासामान्ये दर्शितत्रित्वावच्छिन्नाभावासत्वेन साध्याभावस्य प्रतियोगिवैयधिकर-
णानिर्वाहात् प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे च नेयमनुपपत्तिः द्रत्वाधिकरणस्फटिकादि-
निष्ठस्य समवायादिना प्रतियोगिअधिकरणस्याभावस्य समवायादिसंबंधावच्छिन्नप्रतियोगितायां स-
मवायिसंयोगादिरूपपरंपरायापरंपराया अवच्छेदकत्वाभावेनोभयाभावाक्षतेः॥ न च स्वसमवायिस-
मवायसंबंधेन घटरूपादिसाध्यके समवायादिना घटादिहेतावव्याप्तिः॥ तत्र किंचित्समवायिनिरूपि-
तत्वविशिष्टस्वसमवायादिसंबंधावच्छिन्नायां हेतुमत्कपालादिनिष्ठसाध्याभावप्रतियोगितायां स-
मवायिसमवायरूपसाध्यतावच्छेदकसंबंधावच्छिन्नत्वसत्वात्॥ न हि तत्र दर्शितप्रतियोगितावच्छेद-

कसंबंधसाध्यतावच्छेदकसंबंधयोः शरीरवैलक्षण्यंकिमपिनास्तेवक्तुं॥स्वाश्रयसंबंधाप्रवेशादितरां
शस्याविशेषात्॥इयांस्तुविशेषदर्शितसाध्यतावच्छेदकसंबंधस्यसंबंधतयाभानेप्रथमसमवायविषय
ताप्रकारतानिरूपिताद्वितीयसमवायविषयताविशेष्यतानिरूपितातुक्तप्रतियोगितावच्छेदकसंबंध
स्यसंबंधतयाभानेद्वितीयासमवायविषयतैवप्रकारताविशेष्यतोभयनिरूपितेतिसचानुपयुक्तएवेति
वाच्यं॥परंपरासंबंधावच्छिन्नाभावस्यहिप्रतियोगितावच्छेदकसंबंधतापरंपराघटकयावद्वस्तुषुविशेष्यवि
शेषणभावापन्नेषुपर्याप्ताविशिष्टसाक्षात्संबंधावच्छिन्नाभावस्यतुतादृशसंबंधताविशेष्यएवपर्या
प्ताविशेषणंतुसंबंधविधयाऽवच्छेदकतायामवच्छेदकमेवनतुतदंतर्भावेनसंबंधविधयाप्रतियोगि
तावच्छेदकत्वस्यपर्याप्तिः ईदृशशरीरस्यैवाभाववैलक्षण्यनिर्वाहात्॥तथाचपरंपरासंबंधेनयत्रसाध्यतात

गदा०

त्वपरंपरापर्याप्तावच्छेदकताकत्वरूपसाध्यतावच्छेदकसंबंधावच्छिन्नत्वं निवेशनीयं॥ उक्तस्थले चाधिकरणविशेषणीभूतसमवायस्य प्रतियोगितावच्छेदकतायामेवावच्छेदकतया प्रतियोगितायां तदंतर्भावेन पर्याप्तावच्छेदकत्वाभावात् इति दिक्॥ इति संयोगसंबंधित्वावच्छिन्नप्रतियोगिकत्वविरहेपि वह्निधूमोभयवत्त्ववह्निरिसाद्दीनां तिव्याप्तिरिति योजना॥ अयंभावः॥ प्रत्येकसंयोगसंबंधित्वावच्छिन्नप्रतियोगिकत्वविरहेण वह्निधूमोभयवान्धूमादित्यत्र संयोगसंबंधसामान्येवह्निधूमोभयत्वावच्छिन्नप्रतियोगिकत्वदेत्वधिकरणानुयोगिकत्वाभयाभावसत्वात्ताहशोभयत्वावच्छिन्नाभावोपि संयोगेन प्रतियोगितावच्छेदकावच्छिन्नमधिकरणतयालक्षणघटकइत्यव्याप्तिःस्यादतः संयोगेनोभयसाध्यकस्थले प्रतियोगितावच्छेदकावच्छिन्नत्वपरित्यज्य प्रतियोगिताश्रयप्रतियोगिकत्वमेव निवेशनीयं॥ तथा च वह्निधूमोभय

वान्वन्हेरित्यादावपिवन्हिधूमोभयत्वाद्यवछिन्नाभावस्यलक्षणाघटकतयापूर्वेकल्पेतिव्याप्तिःस्यादिति
॰स्त्रघसाध्यतावछेदकादिभेदेनचैव्याप्तिपदार्थभेदस्तदेवप्रतियोगितावछेदकावछिन्नत्वपरित्यागःस्यत्ता॰
विशेषेसंभवतितथाचसाधनभेदेनापितुल्ययुक्त्यातद्भेदाद्धूमहेतुकवन्हिधूमोभयात्मकसाध्यघटित
व्याप्तिपदार्थप्रसिद्धिनिर्वाहायतच्छरीरेप्रतियोगिताश्रयवैयधिकरण्यनिवेशनस्यवन्हिहेतुकतदुभय
साध्यकस्थलेकथमतिव्याप्तिप्रसंजकत्वमितिचेत्तयथासंयोगसामान्येद्वित्वावछिन्नप्रतियोगिकत्वा॰
भावनिश्चयदशायामपिधूमेनवन्हिधूमोभयानुमितिर्भवतीतितिप्रयोगिताश्रयप्रतियोगिकत्वघटि
तोभयाभावविषयकेज्ञानेधूमलिंगकतादृशोभयानुमितिजनकमंगीक्रियतेतथातादृशनिश्चयद॰
शायांसकलवन्हिमतामेवधूमवत्त्वमितिभ्रांतानांवन्हिहेतुकतदुभयानुमितिरप्यनुभवसिद्धेतितत्रा

पिप्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावविषयकज्ञानमेवानुमितिजनकं वाच्यं॥ तथा च तद्धे
तुकतत्साध्यकानुमितिजनकज्ञानस्य प्रमात्वप्रसंग इत्येवातिप्रसर्थः॥ एवं वन्हिधूमोभयत्वेनोभयं धूमव्या
पकमिति वाक्याद्यथोक्तनिश्चयदशायां शाब्दबोधो जायते॥ तथा वन्हिधूमोभयत्वेन उभयं वन्हिव्या-
पकमिति ज्ञानाशेषक्तवाक्यादपि योग्यताभ्रमाच्छाब्दबोधः सर्वानुभवसिद्ध इति प्रतियोगिताश्रयप्रतियोगि
कत्वमेव तत्र शाब्दधीविषयः स्वीकरणीयः॥ तथा च तत्तद्विषयधियः प्रमात्वेन तादृशवाक्यस्य प्रमा-
णतापत्तिरपीति॥ वन्हेरित्यत्र धूमादितिनातिव्याप्तिरित्यनंतरमव्याप्तिर्वेति पाठं केचित्कल्पयंति यथा
संरवेन च स्थलद्वये ऽतिव्याप्त्यव्याप्ती योजयंति॥ इदमत्रावधेयं॥ घटद्वयवद्भूतलमित्यादौ द्वित्वोपलक्षि
तघटादिवैशिष्ट्यत्वविशिष्टवैशिष्ट्यं वा भासते आद्ये एकघटादिमत्यपि तत्प्रसंगः॥ न च द्वित्वोपलक्षित

स्यापि व्यक्तिद्वयस्यैव वैशिष्ट्यभासत इति नातिप्रसंग इति वाच्यम् एकस्मिन्नपि धर्मिणि नेदं भ्रमप्रमेणा द्वित्व
भ्रे भ्रमात् तत्प्रकारकप्रतीतावुभयमानानियमात्॥ तादृशबुद्धेर्द्वित्वविशिष्टाभावज्ञानविरोधितानुप
त्तिश्च॥ विशिष्टवैशिष्ट्यज्ञानस्यैव विशिष्टाभावबुद्धिविरोधित्वात्॥ द्वितीये संयोगसंसर्गकतादृशज्ञानमा
त्रस्यैव भ्रमत्वापत्तिः॥ संयोगरूपवैशिष्ट्ये द्वित्वविशिष्टप्रतियोगिकत्वस्य बाधात् तस्माद् द्वित्वादिविशिष्ट
भावप्रतीतौ संयोगमात्रेन संबंधः॥ अपि तु द्वित्वावच्छिन्ननिरूपिता संयोगावच्छिन्नाधिकरणतैव॥ अधि
करणता च पदार्थान्तरं अधिकरणस्वरूपं वा उभयथैव निरूपकभेदेपि निरूपकतावच्छेदकद्वित्वस्
स्यैक्यात्तद्भेदेन संयोगप्रतियोगितावच्छेदकत्ववन्न तत्प्रतियोगितावच्छेदकताया द्वित्वेनुपपत्तिरित्यु
पेयं॥ एवं च वह्निधूमोभयत्वावच्छिन्नसाध्यके संयोगावच्छिन्नाधिकरणताया एव साध्यतावच्छेदकसंबं

धत्वात्तत्रचतदुभयत्वावच्छिन्नप्रतियोगिताकत्वसत्वान्नाव्याप्तिप्रसक्तिः॥अन्यथाद्वितीयकल्पेपिप्रतियो
गितावच्छेदकावच्छिन्ननिरूपितप्रतियोगितावच्छेदकसंबंधानुयोगित्वनिवेशात्तदुभयत्वावच्छिन्नप्रति
योगिकसंयोगाप्रसिद्ध्यासंयोगेनोभयत्वावच्छिन्नसाध्यकेव्यभिचारिणितत्संबंधावच्छिन्नप्रतियोगिता
यालक्षणाघटकत्वेनातिव्याप्तेर्वज्रलेपत्वात्।वस्तुतस्तु॥पर्वतोवन्हिमानित्यादावपिसंयोगावच्छिन्नाधि
करणत्वसंबंधेनतुसंयोगमात्रं॥अन्यथापर्वतोवन्हिमानित्यत्रैवपर्वतेवन्हेरसत्वापिसंयोगमा
त्रस्यैवतथात्वापत्त्याविशेषप्रसंगात्॥तादृशप्रतीतौविशेषायप्रथमायांसंयोगोद्वितीयायांतदवच्छि
न्नाधेयतासंसर्गइत्युपेयतेकिंवाप्रथमायांसंयोगावच्छिन्नाधिकरणताद्वितीयायांसंयोगस्तत्रैतस्यत्रविनि
गमकस्यदुर्लभत्वात्॥नचतादृशप्रतीत्योःसंसर्गांशेविलक्षणत्वेपिविषयत्वाविशेषणाभावभेदावेल

क्षणोपपत्तिसंभवइतितत्रयथैवसंयोगमात्रस्यसंबंधतास्त्वितिवाच्यं॥पर्वतोवन्हिमान्वन्हौपर्वतश्च
नयोःपर्वतेवन्हिःपर्वतवान्वन्हिरित्यनयोश्चप्रतीत्योर्विशेषानिर्वाहात्॥नचैवं [illegible] पवानित्यादावपिसम
वायावच्छिन्नाधारतैवसंबंधःस्यात्नतुसमवायःउक्तयुक्तेरविशेषादितिवाच्यं॥समवायातिरिक्तसंम
वायावच्छिन्नाधारतानभ्युपगमात्॥अथसमवायावच्छिन्नाधारतायाःसमवायरूपत्वेसमवायावच्छिन्नाधे
यताऽवश्यमतिरिक्तास्वीकरणीया॥अन्यथारूपवान्घटःघटेरूपमितिप्रतीत्योःसंसर्गवैलक्षण्यानुप
पत्तेः॥तथाचसमवायावच्छिन्नाऽऽधेयताऽऽधारतावाऽतिरिक्तेत्यत्रविनिगमकंतुल्येनमितिसमवाया
तिरिक्ताधारतासिद्धिर्निष्प्रत्यूहैवेतिचेन्न॥घटानुयोगिकरूपप्रतियोगिकसंबंधोरूपानुयोगिकघट
प्रतियोगिकसंबंधःपरस्परंविलक्षणएवचान्यथादर्शितस्थलेसंसर्गवैलक्षण्यानिर्वाहादिति॥स

गदा०

सः॥तत्रचाधारानुयोगिकःसंबंधएवसमवायइतिपरिभाषितः॥नत्वाधेयानुयोगिकःसमवायःसत्ता
धेयतेत्येवपरिभाष्यतेतत्रकोविनिगमकानुयोगः॥नचैवंसंयोगिन्यपिसंयोगएवाधारतास्तुसचानुयो
गितासंबंधेनाधारपदप्रवृत्तिनिमित्तमितिसंयोगस्यादिनिष्ठत्वेपिनाधेयेतव्यवहारइतिसंयोगीयसम-
वायातिरिक्तायाआधेयवाहृत्त्यानुयोगितायाःस्वीकारेतस्याएवसंयोगिनिरूपिताधारतात्वोपगमेनाति
रिक्ताधारतायानिष्प्रत्यूहत्वात्॥नचतत्रसंयोगिप्रतियोगिकत्वंकल्पनीयमितिगौरवं॥भवन्मतेपि
संयोगेतत्समवेतत्वातिरिक्तस्यतत्प्रतियोगिकत्वस्यकल्पनीयतयासाम्यात्॥अन्यथाभूतलादेः
स्वसमवेतघटादिसंयोगितयास्वाधारतापत्तेः॥एतेनसंयोगिन्याधेयतापिसंयोगएवप्रतियो-
गितासंबंधेनतस्याधेयपदप्रवृत्तिनिमित्ततयानाधेयेतव्यवहारइत्यपिनिरस्तं॥साधेयनिष्ठाधार

व्याहृत्तपदार्थांतरकल्पनायाश्चावश्यकत्वात्॥ आधाराधेययोः संयोगानुयोगित्व[illegible]तियोगिकत्वकल्प
नेविपरीतकल्पनायामपिबाधकाभावाच्चेतिदिक्॥ एकानुयोगिकसंयोगद्वयप्रतियोगितयोः प्रत्येक
मुभयत्वावच्छिन्नत्वविरहेपितदुभयत्वेनोभयत्वाद्यवच्छिन्नत्वोपगमात्रसंयोगेनोभयसाध्यकेव्याप्तिरि
त्यपाहुः॥ प्रतियोगित्वावच्छेदकत्वादेः स्वरूपसंबंधरूपतयासंबंधत्वेनतन्निवेशेसंबंधत्वस्यानियम
घटिततयानवस्थेत्याशंकांनिरस्यति॥ प्रतियोगित्वादिश्चेति॥ संबंधविशेषोपिनसंबंधत्वेनलक्षणघट
कः अपितुप्रतियोगितात्वादिनाकुत्रचित्संबंधविधयास्वरूपतएवेत्यर्थः॥ ननुसामानाधिकरण्यंपत
त्संबंधिसंबंधित्वंतत्रसंबंधित्वेनैवसंबंधनिवेशात्साशंकाह॥ सामानाधिकरण्येपीति॥ संयोगत्वादि
नैवेति॥ साधनतावच्छेदकादिभेदेनैवसंबंधादिभेदेनापिव्याप्तिभेदस्येष्टत्वादितिभावः साध्यसामा

गदा५ नाधिकरणपश्चारीरे साध्यवत्त्वंयुक्तत्वादिरूपेदेतोःसंबंधस्यप्रकारतयातस्यैवसंयोगत्वादिनानिवेशः॥सा-
ध्यसंबंधस्यचधर्म्यंशेतत्संसर्गविधयैवैधयैवलाघवेननिवेशात्तस्यस्वरूपतएवनिवेशःसंभवति॥
ज्ञानातिरिक्तस्यापिसंबंधतयाभानेस्वरूपतोपितदुपगमात् इत्यवधेयम्॥संबंधत्वनिवेशेपिनस्य-
तिरित्याह॥दर्शितंचेति॥नियमाघटितमिति॥तस्यातियोगिकत्वविशेषएवतदीयसंबंधत्वं॥ननुतद्वि-
शिष्टबुद्धिनियामकत्वंस्वतोडियसंबंधेजनकत्वरूपनियामकत्वासंभवात्॥विषयत्वरूपनिया-
मकत्वनिवेशेव्याप्तेरेवानंतभावात्॥प्रमेयमात्रैतिःप्रसंगाच्च॥नचविशेष्यतान्यतत्प्रकारतानिरू-
पितविषयतायाविवक्षणीयतयानातिप्रसंगइतिवाच्यं॥एवमपिसंयोगादिनाद्रव्यत्वादिभ्रमविष-
यतामादायतस्यापितत्संबंधत्वापातात्॥नचविषयतायांप्रमात्वतियोगिकत्वनिवेशात्तत्रायमतिप्र

संगइतिइतिवाच्यं॥ अभावत्वस्य तत्संबंधानुयोगिविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपतायां संबंध
त्वघटितत्वात्॥ एवं तदनुयोगिकत्वविशेषण एव तत्र संबंधत्वमिति भावः इत्थं च सामान्यतः संबंधघ
टितसाध्यवत्संबद्धत्वरूपसामान्यसामानाधिकरण्यं साध्यवदनुयोगिकप्रतियोगित्वं प्रतियोगि
योगितासंबंधेन साध्यवदनुयोगिकवत्त्वं वा तच्च संयोगत्वादिना तदघटितात् साध्यवदनुयोगिक
संयोगिकसंयोगप्रतियोगित्वादिरूपात् लघुशरीरमिति तदेव व्याप्तिशरीरघटकं वाच्यं॥ व्याप्तिप्रसं
गस्य व्यापकतायां विशिष्यसंबंधनिवेशेनैव वारणसंभवात्॥ हेतौ साध्यवदसंयुक्तत्वादिनिश्चय
दशायां संयोगादिना पक्षे हेतुमत्तानिश्चयस्य साक्षादनुमितिप्रतिबंधकतायाः अग्रे वक्ष्यमाणतयात
त्रानुमित्यापत्तेरनवकाशादिति सूचितं॥ अभावत्वं चेदत्र भावभिन्नत्वं तदा प्रतियोगितायां साध्य

तावच्छेदकधर्मावच्छिन्नत्वतादृशसंबंधावच्छिन्नत्वोभयाभावनिवेशपक्षेदैशिकविशेषणतयाघटत्वा
भावादिसाध्यकेव्यभिचारिण्यतिप्रसंगः॥तादृशसंबंधावच्छिन्नतदभावस्यघटत्वादिरूपतयाभावभि
न्ननिरूपितप्रतियोगितायांतत्संबंधावच्छिन्नत्वघटत्वाभावत्वावच्छिन्नत्वोभयाभावस्याक्षतत्वादिति
शंकांनिरस्यति॥अभावत्वंचेत्यादिना॥इदमिदंनास्तिइदमिदंनभवतीति॥द्विविधप्रतीतिदर्शनेनाभा
वत्वस्यसंसर्गाभावान्योन्याभावोभयसाधारण्येप्रमाणमुपदर्शितं॥तस्मान्योन्याभावसाधारण्यविर
हेः भावांतरप्रतियोगितासामान्येतादात्म्यसंबंधावच्छिन्नत्वविरहेणातेनसंबंधेनसाध्यतायांव्य
भिचारिण्यतिप्रसंगात्॥भावाभावसाधारणइति॥भावेनावेपिघटेघटत्वाभावोनास्तिघटोनघट
इतिप्रतीतेर्जननादितिभावः॥तदवच्छिन्नेचाभावपदस्यरूढिशक्तिःपरिभाषैववाऽसतानभा

वोऽनावश्यत्वयवमुक्तत्वात्धर्मोप्रत्ययेपिनक्षतिः॥स्वरूपसंबंधविशेषइति।अभावेतत्स्वरूपप्र-
तियोगिताऽनुयोगित्वनामासंबंधविशेषइत्यर्थः॥नचाभावत्वस्यस्वरूपसंबंधरूपत्वेऽननुगमात्
नुगतप्रत्ययानुपपत्तिस्तदनुगमकरूपांतराभ्युपगमात्॥पदार्थांतरत्वेपिनिरूपकभेदेनसंबंधां
तरवच्छेदस्यावश्यकतयाऽनुगमकरूपांतरापेक्षणात्॥यत्तु।प्रतियोगिनिरूपितसंबंधानामननुग
मेपिप्रतियोगिधर्मितावच्छेदकस्यनञ्पदप्रवृत्तिनिमित्तत्वेऽधर्मांतरस्यसत्वाद्घटोनास्तिपटो
नास्तीत्याद्यनुगतमतिनिर्वाहइति॥तन्नसाधीयः॥घटादौघटाभावादेःकालिकादिसंबंधस्यापि
स्वरूपतयातत्संसर्गकप्रतीतितोघटाभावोनास्तीत्याद्यनुयोगितासंसर्गकप्रतीतेर्वैलक्षण्यायसं
सर्गतावैलक्षण्यस्यावश्यकतयासंसर्गतावच्छेदकधर्मविशेषस्वकारस्यतन्निर्वाहकस्यावश्यकत्वात्तेना

ग.१०

नुगतीकृतानुयोगितायाएवसंसर्गतावद्धर्मितावच्छेदकतायाअपिसंभवेनाभावनिष्ठाखंडधर्मांतरेमा
नाभावात्॥नञ्पदप्रवृत्तिनिमित्ततायाअपितस्यामेवोपगमात्॥अथनास्तीत्यादावनुयोगितारूपसंबं
धविशेषप्रकारेणाभावभानोपगमेतदंशेएवस्वनिरूपितत्वसंबंधेनप्रतियोगिनःप्रकारत्वसंभवा
दभावांशेतत्संबंधेनप्रतियोगिनोभानाभावादनुयोगितायाःसंबंधत्वमेवनसिध्यतीतिचेन्न॥म
ण्याद्यभावस्यदाहादिहेतुतायांमण्यादिरूपप्रतियोग्यवच्छिन्नानुयोगिताविशेषस्यावच्छेदकत्वापे
क्षयानुयोगितासंबंधेनमण्यादेस्तथात्वलाघवेनतत्संबंधतासिद्धेः॥नचोभयाभावादिवारणाय
मणित्वाद्यवच्छिन्ननिरूपितानुयोगितामण्यादेःसंबंधोवाच्यः॥तथाचतादृशानुयोगितायाःस्वा
श्रयतासंबंधेनावच्छेदकत्वेपिनगौरवमितिवाच्यं॥उभयत्वाद्यवच्छिन्ननिरूपितायाअनुयोगिता-

योनुयोगितायामणित्वादिविशिष्टसंबंधताविरहात्॥ स्वत्वानुयोगितासंबंधेनैवमणित्वादिविशिष्ट
स्यतन्नयत्वाद्यवच्छिन्नानाव्यावर्त्तकतासंभवेनतादृशानुयोगितात्वेनसंबंधतानुपगमात्॥ नचता
वतापितादृशस्यविशिष्टमणित्वाद्यवच्छिन्नाभावव्यावर्त्तकतानसंभवति॥ विशिष्टमणित्वाद्यवच्छि
न्ननिरूपितानुयोगितायामप्यधिकंत्वित्यादिन्यायेनमणित्वादिविशिष्टनिरूपितत्वसत्वेनतस्याअ
पितत्संबंधत्वादितिवाच्यं॥ कारणतावच्छेदकतापर्याप्त्यधिकरणपरिसमाप्तवृत्तियोगिताकसंबं
धिनएवकारणतयामणिर्नास्तीत्याकारकस्तुवमणित्वाद्यवच्छिन्नप्रकारकप्रतीत्यविषयविशे
षणांतरसहितमणित्वाद्यवच्छिन्नाभावनिष्ठतादृशमणित्वाद्यवच्छिन्ननिरूपितसंबंधचस्तुवम
णित्वादिविशिष्टपरिसमाप्ततियोगिताकत्वविरहेणतादृशाभावव्यावर्त्तनसंभवात्॥ एतेनविशि

ष्टमणित्वाद्यवच्छिन्नाभाववारणाय स्वमणित्वाद्यवच्छिन्नप्रतियोगिताकत्वेन हेतुतायाम्॥ स्वमणि-
त्वाद्यवच्छिन्नत्वं च मणित्वान्यधर्मानवच्छिन्नत्वं तदपि यदि तादृशधर्मावच्छेद्यत्वत्वावच्छिन्नाभावस्तदा
किंचिद्विशिष्टतादृशावच्छेद्यत्वत्वावच्छिन्नाभावमादायातिप्रसंग इति॥ स्ववतादृशावच्छेद्यत्वत्वावच्छि-
न्नाभावत्वं निवेशनीयः॥ स्ववतादृशावच्छेद्यत्वत्वावच्छिन्नत्वमपि तदतिरिक्तानवच्छिन्नत्वमिति विशे-
षणानवस्थाप्रसंग इत्यपि निरस्तमित्यलमप्रस्तुताधिकजल्पनया॥ तदपि तादृशाभावत्वमपि॥ नो-
पादेयं॥ हेतुसमानाधिकरणविशेषणांशे विशेषणतया न निवेशनीयं॥ प्रयोजनाभावादिति॥ स्वा-
वच्छेदकविशिष्टानधिकरणहेतुमन्निष्ठत्वमात्रपुरस्कारेणाभावे निवेश्य तदीयत्वेन प्रतियोगि-
तानिवेशादेव सर्वसामंजस्यादिति भावः॥ प्रसंगात्प्रतियोगित्वादीनां पदार्थान्तरत्वमवस्थापय-

ति।विषयेतेति।तत्वं।विषयतात्वं।प्राचीनैकदेशिभिर्विषयतायाऽतिरिक्तपदार्थत्वोपगमात्तद्दृशो
ष्टेतत्वेनतद्रुपन्यासः॥यथाविषयतायाविषयरूपत्वेद्रव्यत्वावच्छिन्नघटविषयकज्ञानाघटत्वावच्छि
न्नयाविषयतायावैलक्षण्यविरहादवैलक्षण्यापत्तिः॥नचद्रव्यत्वघटत्वयोरपितत्वविषयतयात-
वैलक्षण्यादेववैलक्षण्यमितिवाच्यं॥तावतापिद्रव्यत्वेनघटविषयकाद्घटत्वेनचपटविषय-
काज्ज्ञानाद्घटत्वेनघटेद्रव्यत्वेनपटमवगाहमानस्यज्ञानस्यवैलक्षण्याद्युपपादेहेदनस्याशक्यता
त्।ज्ञानस्वरूपत्वेघटपटादिविषयादिसमूहालंबनीयघटपटादिविषयतानामभिन्नतापत्यातादृ
शज्ञानस्यघटत्वाद्यवच्छिन्नघटादिनिष्ठविषयताशालितयाभ्रमत्वापत्तिर्ज्ञानविषयोभयरूपत्वे
चजातिमान्घटइत्यादिज्ञानीयघटत्वादिविषयतायांवैविध्यानुपपत्तिःज्ञानविषययोरविशेषादि

ति॥ जातिमान् घट इत्याद्याकारकैकविधघटत्वादिविषयताशालिज्ञानानामाहत्यानुभवे वैलक्षण्याकार-
तानस्मादित्यादियुक्त्या विषयतायां विषयादिभेदभिन्नविषयतानामननुगमकतया च विषयतात्वस्या-
तिरिक्ततासिद्धेस्तथा प्रतियोगितायाः प्रतियोगिस्वरूपत्वे घटादिनिष्ठानां घटत्वद्रव्यत्वादिरूपवि-
भिन्नधर्मावच्छिन्नानां संयोगसमवायादिरूपविभिन्नसंबंधावच्छिन्नप्रतियोगितानामवैलक्षण्ये-
नाभाववैलक्षण्यानुपपत्तिः अभावस्वरूपत्वे घटाद्यभावीयप्राभावीयघटत्वाद्यवच्छिन्नप्रति-
योगित्वं किंचिदिति घटाभावाभावत्वाद्यवच्छिन्नप्रतियोगितानामवैलक्षण्यापत्तिः॥ घट-
त्वादेः प्रतियोगित्वन्यूनवृत्तितया तदवच्छेदकत्वानुपपत्तिः॥ घटाद्यभावस्य पटादिसाधारण्ये-
न पटादेरपि तत्प्रतियोगितापत्तिश्चेत्यादियुक्त्या प्रतियोगित्वमप्यतिरिक्तं सिध्यति॥ एवमधिकर

णत्वेनाधिकरणस्वरूपमाधेयस्वरूपं वा भूतले घटसंयोगदशायामिव परस्परासंयुक्तघटभूतल
सत्वदशायामपीदानीं भूतले घटवदिति भ्रमप्रसंगात्॥ संयोगरूपत्वेप्याधेयत्वस्यापि तुल्ययु
क्त्यातद्रूपतयाप्याधारत्वाधेयत्वयोरभेदप्रसंगेनवैपरीत्येनाधाराधेयभावज्ञानप्रसंगादिति तद
पि तद्व्यतिरिक्तः पदार्थः॥ संबंधत्वमपि क्लृप्तपदार्थांतर्भावेन दुर्वचमिति पदार्थांतरमेवेति भा
वः॥ आदिपदादभावत्वादिपरिग्रहः॥ इदं तु बोध्यं॥ अभावत्वप्रतियोगित्वानामतिरिक्तत्वमते त
द्भावस्य तत्प्रतियोगित्वनियमात्॥ नन्वेवं घटादेर्घटादिभेदाभावत्वापत्त्या घटादिमति भूतले घ
टभेदो नास्तीत्यादिप्रतीत्यापत्तिरिति वाच्यं॥ संसर्गावच्छिन्नप्रतियोगिताया एवाभावत्वरूपतोपग
मात्॥ घटादिभेदस्य घटत्वात्यंताभावसमनियतत्वेन तद्भिन्नतया घटत्वादौ तदीयसंसर्गा

गा।दा॰ वच्छिन्नप्रतियोगितास्यैवतदभावप्रत्यायनात्॥नच्चैवमपिघटभेदादेर्घटाद्यभावत्वानुपपत्तिस्तद
प्रतियोगित्वादितिवाच्यं॥स्वत्वताभावत्वात्मकानुयोगिताविशेषस्यैवप्रतियोगितानतिरिक्तत्वोप
गमादिति॥इतिसिद्धान्तलक्षणंसमाप्तं॥ ॥

[illegible]